प्यन्यदस्ति प्रधानमिति। कार्याद्धि कारणानामुपलब्धिर्दृष्टा। विस्तीर्णविटपशाखं न्यग्रोधपादपं दृष्ट्वानुमीयते — अस्त्यसौ जननक्रियासमर्था न्यग्रोधवनी यस्या अनुपलभ्यमानाया अपीदं कार्यमुपलभ्यते। एवमिहाप्यास्ति प्रधानं ⟨यत्⟩ सौक्ष्म्यादनुपलभ्यमानं कार्यदर्शनादनुमीयते न्यग्रोधवनीवत्। जगतः क्रियायां⟩ समर्थमेव प्रधानं यस्येदं कार्यमिति। अत्राह। किं च कार्यमिति, यदुपलभ्य प्रधानमनुमीयत इति। अत्रोच्यते — महदादि तच्चकार्यम्, महा(न्) न्यस्य कार्यस्यादि(ः)। तदिदं कार्यं महदादि(रि)त्युच्यते। बुद्धेरहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतान्येतत्कार्यम्। किञ्चान्यत् —

प्रकृतिविरूपम्, प्रकृतिः प्रधानमित्यर्थः। प्रकृतिविरूपं प्रकृतेरसदृशमित्यर्थः। प्रकृतिसरूपं प्रकृतिसदृशमित्यर्थः। यैर्येर्हेतुभिः प्रधानात् {(अ)} (अ)सदृशं व्यक्तं सन्ति तेऽपि हेतवः। यैश्च हेतुभिः सदृशं व्यक्तं प्रधानात् तेऽपि हेतवः सन्ति। लोके पितुस्तुल्यः पुत्रः चातुल्यः, यदि रूपेण तुल्यो गुणैर्न तुल्यः। गुणैस्तुल्यो न रूपेण। एवं च व्यक्तं प्रधानस्य तुल्यं न तुल्यं च। हेतुर(नु) परिष्टाद्वक्ष्यामः॥८॥

अत्राह — तिष्ठतु तावदेतत् सारूप्यं (वैरूप्यं) चोत्तरप्रश्नं प्रब्रूहे। सतां ह्येष सामयस्तावत् स्यात्। क एष दोषः स्यात्। यमर्थं शिष्यः पृच्छति तं शिष्यं प्रत्याचार्येण वक्तव्यम्। प्रकरणमपि परित्यज्याचार्यः शिष्यं ब्रवीत्युत्तरप्रश्नमिति।

अत्राह — शिष्यो यदेतन्महदादिकार्यं तत् प्रागुत्पत्तेः स्यात्, आहोस्विदसदिति। कुत आशङ्केति चेद्धेतुर् आचार्यविप्रतिपत्तेः संशयः। इहाचार्या विप्रतिपत्तौ वैशेषिका आर्हता बौद्धाश्च। वैशेषिकास्तावत् प्रागुत्पत्तेर्मृत्पिण्डे घटो नास्तीति व्यवसिताः। अस्ति नास्तीति चार्हताः। नैवास्ति नैव ⟨नास्ति⟩ इत्युपगतः ⟨पक्षः⟩ बौद्धानाम्। एवं व्यवस्थिते कोऽत्र निश्चयो भवतीति॥ अत्रोच्यते — आर्हतानां प्रतिषेधं वक्ष्यामि। आर्हतानां सदसत्कार्यं तत् कथयति। यदि सत्, असन्न भवति। अथासत् सन्न भवति। तस्मात् सदसतोर्वि(रु)द्धानां पक्षपरिग्रहाभावात् तैस्तैः सह संकल्यः॥ वैशेषिकाणामसत्कार्यप्रतिषेधं वक्ष्यामि। तद्यथा —

असदकरणादुपादानग्रहणात् सर्वसम्भवा(भा)भावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥९॥

असदकरणात् — न सद् असत्, (तस्या)करणम् असदकरणम्। यद्य(स)स(त्) कार्यं स्यात्, सिकताभ्यस्तैलनिष्पत्तिः स्यात्। न च निष्पद्यते। तस्मादसदकरणात्। पश्यामः प्रधाने व्यक्तमस्ति प्रागुत्पत्तेरिति। तस्मात् सत्कार्यमिति॥

उपादानग्रहणात् — उपादानस्य ग्रहणं तस्मादुपादानग्रहणात्। येन योऽर्थी ह लोके भवति स तं निमित्तमुपादानं करोति। दध्यर्थी क्षीरस्योपादानं करोति। यद्यसत्कार्यं स्यात्, उदकस्य दध्यर्थ्युपादानं कुर्यात्। न च करोति॥

(सर्वसम्भवा(ा)भावात् । यद्यसत्कार्यं स्यात् सर्वं सर्वत्र सम्भवेत्, तृणपांशुवालुका-भ्यो(ः) रजतसुवर्णवज्रादीनि क्रियेरन्, न च तत् क्रियते । तत्कार्यं प्रागुत्पत्तेः कारणस्थितम् ॥ किञ्चान्यत् — शक्तस्य शक्यकरणात् । इह शक्तः कुलाल(ः) करण(-उपकरणैः){।} मृत्पीण्डदण्डचक्रसूत्रोदकविदला(दि)भिः शक्यं घटं करोति नाशक्तः शक्यं करोति । कारणभावाच्च सत्कार्यम् । यल्लक्षणं (कारणं) तल्लक्षणं कार्यं भवति । यथा कोद्रवेभ्यः कोद्रवा व्रीहिभ्यो व्रीहयः निष्पाद्यन्ते । यद्यसत्कार्यं स्यात् कोद्रवेभ्यः शालीनां निष्पत्तिः स्यात् । न तु भवति । कस्मात्? कारणभावादिति । कारणेषु प्रागुत्पन्नं स्यात् कार्यमिति ॥ एवं {।} पञ्चभिर्हेतुभिः प्रधाने महदादिकार्यमस्तीति । एकस्मात् सत उत्पत्तेरिति । अयमन्तरप्रश्नः परिसमाप्तः । प्रकृतं वक्ष्यामः ॥ ९ ॥

अत्रोच्यते —

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

प्रकृतिविरूपं (सरूपं) चेति यदुक्तं तद्वक्ष्यामः, यत्र महदादि लिङ्गं प्रकृतितुल्यं चा(ा)तुल्यं च, येन तावद(तु)ल्यताहेतून् वक्ष्यामः ॥ तदुच्यते — हेतुमत् । हेतुमन्नाम — हेतुर(र)स्यास्तीति हेतुमत् । हेतुरपदेशो, लिङ्गं, निमित्तं, प्रमाणं,

कारणमिति पर्यायाः । प्रधानस्यैते पर्यायशब्दाः । प्रधानं हेतुः, तन्महदादिलिङ्गं भूतपर्यन्तं हेतुमत् । बुद्धिः प्रधानेन तु हे(तु)मती । अहङ्कार(ो) बुद्ध्या हेतुमान् । पञ्चतन्मात्राण्येकादशेन्द्रियाण्य् अहङ्कारेण हेतुमन्ति । आकाशं शब्दतन्मात्रेण हेतुमत् । वा(यु)ः स्पर्शतन्मात्रेण हेतुमान् । तेजो रूपतन्मात्रेण हेतुमत् । आपो रसतन्मात्रे(ण) हेतुमत्यः । पृथिवी गन्धतन्मात्रेण हेतुमती । एवं सर्वं हेतुमत् ॥ किञ्चान्यत् — अनित्यम् । महदादिलिङ्गं सर्वं यस्माद् <अन्यस्माद्> उत्पद्यते तस्मादनित्यम् । <यथा> - मृत्पिण्डादुत्पद्यते घटः{।} सोऽप्यनित्यः । तथैव महदादिलिङ्गमुत्पद्यते, तस्मादनित्यमिति । प्रलयकाले महाभूतानि तन्मात्रेषु प्रलयं गच्छन्ति । तन्मात्राणीन्द्रियाण्यहङ्कारे । अहङ्कारो बुद्धौ, बुद्धि(श्च) प्रधाने । अतः सर्वमनित्यं व्यक्तं महदादि कार्यमिति ॥ (किं) चान्यत् — अव्यापि न व्यापि । महदादिलिङ्गम् असर्वगतमित्यर्थः । यथा प्रधानपुरुषौ दिवि भुवि चान्तरिक्षे च वर्तते, तन्महदादिलिङ्गं न वर्तते ॥ किञ्चान्यत् — अव्यापि व्यक्तम् असर्वगतत्वात् । व्यापि प्रधानं, कस्मात् सर्वगतत्वात् ॥ किञ्चान्यत् — अनेकं व्यक्तम् । एकं प्रधानं, कस्मात्? कारणत्वात् । त्रयाणां लोकानां कारणं प्रधानं तस्मादेकम् ॥ किञ्चान्यत् — आश्रितं व्यक्तं कार्यत्वात् । निराश्रयं प्रधानम् अकारणत्वात् । न हि प्रधाना(त्परं) किं(चि)दस्ति, यस्य प्रधानं कार्यं स्यात् ।

तस्मान्निराश्रयं प्रधानम्॥ किञ्चान्यत्—सक्रियं व्यक्तम्, यस्मात् संसारकाले संसरति महदादिलिङ्गम्। निष्क्रियं प्रधानम्, कस्मात् सर्वगतत्वात्॥ सावयवं व्यक्तं शब्दादिभिर्युक्तमित्यर्थः। निरवयवं प्रधानम्{।} न हि शब्दादयः प्रधाने विद्यन्ते, तस्मान्निरवयवं प्रधानम्॥ किञ्चान्यत्—परतन्त्रं नात्मनः प्रभवतीत्यर्थः॥

एवमेतद्व्यक्ताव्यक्तयोर्वैरूप्यं व्याख्यातं वैधर्म्यमित्यर्थः। साधर्म्यमिदानीं वक्ष्यामः। "प्रकृति(विरूपं) सरूपं च" इत्युक्तं तदुच्यते—

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा (च) पुमान्॥११॥

व्यक्तमव्यक्तं चेति तस्य व्याख्यानम्। त्रिगुणं व्यक्तम्। सत्त्वरजस्तमांसि त्रयो गुणाः। तैर्गुणैः(युक्तम्)। बुद्धिरहङ्कारः तन्मात्राणीन्द्रियाणि पञ्चमहाभूतानि त्रिगुणानि। अतस्त्रिगुणमव्यक्तम्॥ किञ्चान्यत्—अविवेकि। "विचिर् पृथग्भावे" (धातुप॰ 1443) तस्य णिनि प्रत्यये विवेकि। न विवेकि 'अविवेकि' इत्युक्तं भवति। इमानि सत्त्वरजस्तमांसि इदं व्यक्तं (इति) पृथङ् न शक्यते वक्तुम्। यथा गौरश्वमिति; एवं तावद्व्यक्ताव्यक्तयोर्विभागो न शक्यते वक्तुम्। ये गुणास्तदव्यक्तं तस्मादुच्यते—'अविवेकि' इति॥ किञ्चान्यत्—विषयो व्यक्तम्। भोग्यं

सर्वपुरुषाणमित्यर्थः। किञ्चान्यत्—सामान्यं यथा मल्लदासी सर्वेषां सामान्या। एवं विषयो महदादिलिङ्गं सर्वपुरुषाणां सामान्यम्॥ किञ्चान्यत्—अचेतनं महदादिलिङ्गम्। सुखदुःखमोहान्न(न) वेदयतीत्यर्थः॥ प्रसवधर्मि—प्रसवधर्मो ऽस्यास्तीति इनि प्रत्यये। बुद्धिरहङ्कारं प्रसूते। अहङ्कारस्तु तन्मात्राणीन्द्रियाणि च। तन्मात्राण्यपि भूतानि च प्रसवन्ति, एवं प्रसवधर्मि। व्यक्तं गुणादिप्रसवधर्मि। षष्ठकमिति॥ किञ्चान्यत्—तथा प्रधानम्। यथा त्रिगुणं व्यक्तं तथा प्रधानमपि त्रिगुणम्। कस्मात्—इह लोके यदात्मकं कारणं तदात्मकं कार्यं भवतीति। यदि कृष्णास्तन्तवः, कृष्णपटो भवति। अथ शुक्लास्तन्तवः शुक्लपटो भवति। एवं महदादिलिङ्गं त्रिगुणं दृष्ट्वानुमानेन साधयामः, तदपि प्रधानं त्रिगुणं भवतीति। यतः प्रधानं सत्त्वरजस्तमांसि। त्रयो गुणाः (अव्यक्तं न स्युः, व्यक्ते गुणाः कुतः स्युः। पश्यामः प्रधानमेव त्रिगुणम्॥ किञ्चान्यत्—अविवेकि व्यक्तं त्रिभिर्गुणैर्न वियुज्यते।{।} अन्ये गुणा अन्यद्व्यक्तम्) इति न शक्यते वक्तुम्। न तथान्ये गुणा अन्यत् प्रधानमिति शक्यते वक्तुम्। प्रधानमपि गुणैर्युक्तम्॥ किञ्चान्यत्—व्यक्तं सर्वपुरुषभोज्यम्। सामान्यविषयत्वाद् व्यक्तं सामान्यं, मल्लदासीवत्। प्रधानमपि विषयत्वात् सर्वपुरुषसामान्यम्॥ अचेतनं व्यक्तं, प्रधानमप्यचेतनं सुखदुःखमोहान्न वेदयति; इति कथमवग-

म्यते। लोके दृष्टत्वादचेतनं भवति, अचेतन[1]मृत्पिण्डोत्पन्नो[2] घटोऽचेतनो दृष्टः।
एवमिदं व्यक्तं तदाऽचेतनं, प्रधानमप्यचेतनं भवतीति[3] गम्यते॥ किञ्चान्यत्—
प्रसवधर्मि(अ)[4]व्यक्तमित्युक्तं, प्रधानमपि प्रसवधर्मि। किं प्रसवधर्मि, बुद्धि[5]<आदिकं>[6]
प्रसव<धर्मि>[6] इति तथा प्रधानमपि। एवमेतद् व्यक्ताव्यक्तयोः साधर्म्यं व्याख्यातम्।
यदुक्तं सरूपं[7] चेति तस्यवचनस्यार्या समाप्ता॥ अत ऊर्ध्वं[8] व्यक्ताव्यक्तपुरुषाणां
साधर्म्यं वैधर्म्यं च व्याख्यास्यामः। तद्विपरीतस्तथा च पुमान्। ताभ्यां विपरीत
इत्यर्थः स पुमान्। त्रिगुणं व्यक्तं (अव्यक्तं) च, निर्गुणः[9] पुरुषः। सत्त्वरजस्तमांसि
त्रयो गुणाः पुरुषे न सन्ति, व्यक्ताव्यक्तयोः सन्ति, तस्मान्निर्गुणः पुरुषः॥{ }[10]
किञ्चान्यत्—अविवेकि[11] व्यक्तमव्यक्तं च। विविक्तः पुरुषः। गुणैर्वियुक्त इत्यर्थो
विशुद्धः॥ किञ्चान्यत्—विषयो व्यक्तमव्यक्तं च। विषयी पुरुषः, भोक्तेत्यर्थः॥
किञ्चान्यत्—सामान्यं व्यक्तमव्यक्तं च। निःसामान्यः[12] पुरुषः॥ किञ्चान्यत्—
अचेतनं व्यक्तमव्यक्तं च। सुखदुःखमोहान्न सम्बोधयतीत्यर्थः। पुरुषो वेदयते[13],
चेतनावान्[14]॥ प्रसवधर्मि व्यक्तमव्यक्तं च। अप्रसवधर्मा पुरुषः। न किञ्चित्
पुरुषात्(प्र)सूयते[15]। तस्मादुच्यते—तद्विपरीतस्तथा च पुमान्॥ किञ्चान्यत्—
तथा च पुमान्(न्)॥ अहेतुमत्[16] प्रधानं पुरुषोऽप्यहेतुमान्। न ह्यन्यस्मात् पुरुष
उत्पद्यते॥ किञ्चान्यत्—अनित्यं व्यक्तं, नित्यं प्रधानं पुरुषोऽपि नित्यः। कस्मात्—

अनुत्पत्तिकत्वात्॥ किञ्चान्यत्—अव्यापि व्यक्तं, असर्वगतत्वात्। व्यापि[1] (प्र)[2]धानं,
कस्मात् सर्वगतत्वादित्यर्थः। पुरुषो<ऽपि> व्यापी सर्वगत इत्यर्थः। किञ्चान्यत्—
सक्रियं व्यक्तं संसरतीत्यर्थः। अथ निष्क्रियं प्रधानं पुरुषोऽपि निष्क्रियः
सर्वगतत्वात्॥ किञ्चान्यत्—आश्रितं व्यक्तं, अनाश्रितं प्रधानम्। पुरुषोऽप्यनाश्रितः
प्रधानतुल्य[3] इत्यर्थः॥ किञ्चान्यत्—लिङ्गं व्यक्तं प्रलयकाले प्रधाने लयं गच्छति
अलिङ्गं प्रधानं, (न)[4] क्वचिल्लयं गच्छति। पुरुषोऽप्यलिङ्गः प्रधानवत्॥{ }[5]
किञ्चान्यत्— सावयवं[6] शब्दस्पर्शरसरूपगन्धवद्व्यक्तं[7] भवति। निरवयवौ
प्रधानपुरुषौ। (अ)व्यक्ते शब्दादयः (न) सन्ति, तस्मान्निरवयवं प्रधानम्।
पुरुषोऽपि निरवयवः, शब्दादयः पुरुषे न सन्ति॥ किञ्चान्यत्—परतन्त्रं
व्यक्तमात्मनो न प्रभवतीति। स्वतन्त्रं प्रधानमात्मनः{ }[8] प्रभवतीति, पुरुषोऽपि
स्वतन्त्र आत्मनः प्रभवतीत्यर्थः। एवमेतदार्याद्वयेन प्रधानपुरुषव्यक्तानां
साधर्म्यं वैधर्म्यं च व्याख्यातम् इति॥

अत्राह त्रिगुणं व्यक्तमव्यक्तं चेति। तत्र के गुणाः किमात्मकाः किंलक्षणाः
किंवृत्तयश्च, यैर्गुणैस्त्रिगुणं व्यक्तमव्यक्तं चेति। अत्रोच्यते—

[प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।]
अन्योन्याभि[9]भवाश्रयजननमिथुनवृत्तयश्च गुणाः॥ १२॥

प्रीत्यप्रीतिविषादात्मका इति प्रीतिश्चाप्रीतिश्च विषादश्च "त्मानि येषां भवन्ति ते गुणाः प्रीत्यप्रीतिविषादात्मकाः। द्वन्द्वो बहुव्रीहिः। तत्र प्रीतिः सत्त्वं, अप्रीती रजः, विषादस्तमः, एतद्गुणलक्षणम्"। किञ्चान्यत् — प्रकाशप्रवृत्तिनियमार्था(ः)। प्रकाशश्च प्रवृत्तिश्च नियमश्च येषामर्था भवन्ति। ते गुणा(ः) प्रकाशप्रवृत्तिनियमार्थाः। तत्र प्रकाशा(र्थं) सत्त्वं प्रवृत्त्यर्थं रजो नियमार्थं तमः। किञ्चान्यत् — अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा इदमाख्यात(म्)। कदाचित् सत्त्वमुत्कटीभूत्वा रजस्तमसी अभिभवति। यथा "दित्यप्रकाशो ग्रहनक्षत्रताराणां प्रकाशमभिभवति दिवा। यदा रज उत्कटीभवति तदा सत्त्वतमसी अभिभवति, यदा तम उत्कटीभवति तदा सत्त्वरजसी अभिभवति, एवमन्योन्याभिभवा गुणाः। अन्योन्याश्रया(ः) परस्परमाश्रिता गुणा वर्तन्ते। यथा त्रयो दण्डाः त्रिदण्डभूतमन्योन्यमाश्रित्य कुण्डिकां धारयन्ते, एवमन्योन्यमाश्रित्य गुणाः सर्वकार्याणि कुर्वन्ति। तस्मादुच्यते — अन्योन्याश्रया इति। किञ्चान्यत् — (अन्योन्यं) जनयन्ते गुणाः। कदाचित् सत्त्वं रजस्तमसी जनयति, कदाचित्तमः सत्त्वरजसी जनयति, एवमन्योन्यं गुणान्। यथा मृत्पिण्डो घटं जनयति तन्तवः पटं, तद्वदेवमन्योन्यं जनयन्ति गुणाः। यथा देवदत्तयज्ञदत्तविष्णुमित्राः परस्परं बोधयन्ति — उत्थितः सूर्यः,

उत्तिष्ठ(त) भवानिति' एवं बुद्धिस्था(ः) (गुणाः) सत्त्वरजस्तमांसि (परस्परं) बोधयन्ति। एवं सत्त्वेन बोधितं रजः सत्त्वेनापि च क्रियां करोति। तथा तमः सत्त्वेन प्रबोधितम्। सत्त्वस्य च रजसश्च तमसश्च क्रिया(ः) याः तासां तिसृणाम् एकीभावं करोति। ततो बोधनसामर्थ्यं भवति। एवमन्योन्यजनका गुणाः। यथा स्त्रीपुंसयोः परस्परमिथुनम् एवं गुणाः परस्परमिथुनाः। अपि चोक्तं —

रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः।

उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते॥

परस्परसहाया इत्यर्थः॥ किञ्चान्यत् — अन्योन्यवृत्त(यः)श्च गुणाः। सत्त्वरजस्तमांस्यन्योन्यावृत्तिं जनयन्ति। यथा काचित् स्त्री राज्ञी कुलस्त्री सा(ध्वी) राज्ञो भार्या परमरूपदर्शनीया प्रथमयौवने वर्तमाना हावभावलीलासम्पन्ना सा भर्तु(ः) सुखा भवति। आत्मनश्च बन्धुवर्गस्य च प्रीतिं जनयति। एवं सत्त्वनात्मनो वृत्तिर्जनिता स्त्रीभूतेन"। सैव स्त्री सपत्नीनां दुःखं जनयति, तथा मोहं चेति। सपत्न्योऽद्विविधाः — दासीसपत्न्यश्च कुलस्त्रीसपत्न्यश्च। तत्र दासी सपत्नीनां दुःखं जनयति। "इयं प्रिया भर्तुः" "वयमप्रियाः" इति दुःखमापन्ना भवन्ति। तासां मोह(म्) उत्पद्यते। "इयं कुलस्त्री" "वयं दास्यः" इति कृत्वा मोहमापन्ना भवन्ति {()}। एवं सत्त्वेन

स्त्रीभूतेन रजस्तमसो{ः} वृत्तिर्जनिता सपत्नीनाम्। किञ्चान्यत् — तथैव सत्त्वं{ं} स्त्रीभूतं तासां कुलस्त्रीणां सपत्नीनां मोहं जनयति। कथम्? ताः कुलस्त्रियो ब्रुवते। "इयम् एका कुलस्त्री वयमकुलस्त्रियः। इयं प्रिया भर्तुः, वयमप्रियाः" इति मोहमापन्ना भवन्ति। एवं सत्त्वेन स्त्रीभूतेन तमसो वृत्तिर्जनिता। एवं सत्त्वं तावदनेकदृष्टान्तैः त्रयाणां गुणानां वृत्तिं जनयति॥ रजसो वक्ष्यामः। यथा कस्मिंश्चिद्देशे चोरा आगम्य ग्रामं घ्नन्ति, तस्मिन् ग्रामे याः कुलस्त्रियः ताः करन्ति। तत्र कश्चित् क्षत्रियो ऽश्वमारूढः तान् चोरान् हन्ति। तस्मिन् क्षत्रिय उपचारो राज्ञो द्रष्टव्यः। राजाते प्रवर्तते तत् क्षत्रियभूतं रजः। अतश्च सत्त्वस्य {।} वृत्तिं जनयति। कथं गम्यत इति। तदुच्यते - क्षत्रियश्चोरान् हन्ति, प्रासेन तेषां दुःखमुत्पादयति। एवं क्षत्रियभूतेन रजसा ऽत्मनो वृत्तिर्जनिता॥ किञ्चान्यत् — तस्मिंश्चोरे हन्यमाने ऽन्यचोराः तमोरजोमूढाः स्थाणुवच्च स्थिता भीता न शक्नुवन्ति गन्तुम् अक्रमयितुं ⟨वा⟩। क्षत्रियो हनिष्यति (इति) । एवं क्षत्रियभूतेन रजसा तमोवृत्तिर्जनिता॥ तमोवृत्तिं वक्ष्यामः। यथा महाकालमेघः तोयधरो ग्रसति नभो भूमिं च, सविद्युद्बलाहको गम्भीरघोषस्तनित इत्युक्तम्। महाकृष्णरूपत्वात् नाम एवोच्यते। स हि तमोभूतः कालमेघस्त्रयाणां वृत्तिं जनयति, तमः कालमेघः कथ्यते।

तदुच्यते कदाचिदयं कर्षकाणां तावत् सञ्जी(कृत)बीजक्षेत्राणां तुष्टिं जनयति वृष्ट्या बीजानि प्ररोहन्तीति ते परमतुष्टा भवन्ति। एवं कालमेघेन तमोभूतेन सत्त्वस्य वृत्तिर्जनिता। किञ्चान्यत् — रजसो वृत्तिं जनयति। तत्कालमेघं दृष्ट्वा दुःखमापन्ना भवन्ति। "अहो वृष्टिः, प्रावृट्कालः संप्राप्तः, कर्ता च परविषयगतो नागच्छति" इति। एवं मेघभूतेन तमसा रजोवृत्तिर्जनित{।}। किञ्चान्यत — विचिकिल्लवणसार्थवाहा लवणशाकर्{मृ}द्विका अस्माद्विषयादन्यविषयं प्रस्थिताः{ः} ते शकटव्यावर्तमानाः कालमेघं दृष्ट्वा मोहमापन्नाः। एवं कालमेघेन तमोभूतेनात्मनो वृत्तिर्जनिता। एवं तमसा त्रयाणां गुणानां वृत्तिर्जनिता। तस्मादुच्यते - अन्योन्यवृत्तयश्च{।}गुणा इति॥

किञ्चान्यल्लक्षणं वक्ष्यामः। तदुच्यते —

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरण(क)मेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ १३॥

तत्र सत्त्वं यस्येदं लक्षणम् — लघुत्वं प्रकाश(क)त्वं च। यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि भवन्ति, शुद्धानि चेन्द्रियाणि विषयग्रहणसमर्थानि भवन्ति; तदा मनाग्गम् अद्य मे सत्त्वमुत्कटं वर्तते (इति)। रजसो वक्ष्यामः तदुच्यते — इष्टमुपष्टम्भकं चलं (च) रजः। यथा युद्धार्थी वृषः प्रतिवृषं

दृष्ट्वा, उपष्टम्भयति। एवं देवदत्ते रज उत्कटं भवति। स कलहं युद्धं मृगयते। चलचित्तश्च भवति। ग्रामं गच्छामि नगरं गच्छामि (इति) नित्यमौत्सुक्यमना भवति। एतद्र(जो)सो लक्षणम्। तमसो वक्ष्यामि, तदुच्यते — गुरु वरणकमेव तमः। यदा तम उत्कटं भवति तस्मिन् देवदत्ते (यो)ज्ञदत्ते वा तस्य गुरूण्यङ्गानि भवन्ति, इन्द्रियाणि चावृतानि भवन्ति। विषयग्रहणासमर्थानि भवन्ति। (आह) — परस्परविरुद्धाश्च शत्रव एकमर्थं न कुर्वन्ति। परस्परविरुद्धाश्चामी गुणाः ते ऽपि पुरुषार्थं न कुर्वन्ति। अत्रोच्यते — प्रदीपवत्। प्रदीपेन तुल्यं प्रदीपवत्। तेन तुल्यं क्रिया च विधीयते। तैलाग्निवर्त्तिसंयोगः प्रदीप इत्युच्यते। यथा तैलाग्निवर्त्तयः परस्परविरुद्धा भवन्ति, पुरुषार्थं साधयन्ति, गर्भगृहगतान् घटादीन् प्रकाशयन्ति। एवं तैलाग्निवार्त्तिभूता(:) सत्त्वरजस्तमांसि त्रयो गुणाः पुरुषार्थं कुर्वन्ति। तस्मात्तदुच्यते — प्रदीपवच्चार्थतो वृत्तिरिति ॥१३॥

त्रिगुणमविवेकिविषयं इत्येवमादि(अयमवि)वेक्यादिगणो{(:)} व्यक्ते सिद्धः, तथा {(:)} प्रधान(म्) इत्युक्तम्। तत् कथं (अ)व्यक्ते ऽपि सिद्धिर् भवति (इति) सन्देहः। सन्देहादयमन्तरप्रश्नो ऽस्ति। तत्त्वेन ब्रूहि। अत्रोच्यते — कुतः संशयः, कस्मात्? अनुपलब्धेः। अनुपलभ्यमानम् अविवेक्यादिगणः पञ्चकः कारणे

विद्यत इत्येतत् कथमवगम्यते। तथा प्रधानमित्येव भावान्न मृष्यते ऽनेनोपोद्घातेनेयमार्या॥ अत्रोच्यते — अविवेक्यादिपञ्चको विदुषा सुखमवगम्यते। कस्मात्? अस्माद्

अविवेक्यादिः सिद्धस्त्रैगुण्यात् तद्विपर्ययाभावात्।

कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥१४॥

सो ऽयमविवेक्यादिगणो (यम्) अव्यक्ते न गृह्णीम {(:)} इति। अत्रोच्यते — तद्विपर्ययाभावात्। आचार्यो ब्रवीति — यदि व्यक्तं गृह्णामि, अविवेक्यादिना गणेन युक्तमव्यक्तमपि गृहीतं त्वया। कथं? — तद्विपर्ययाभावात्। यत्रैव तन्तवस्तत्र पटः। अन्ये तन्तवो दूरे स्थिताः, सन्निकृष्टे (अन्यः) पट इति (न) भवति। यदुक्तं भवति — (यः) पटं पश्यति स तन्तून् पश्यति। एवमेतत् तन्तुपटवद् व्यक्ताव्यक्तयोः सम्बन्धः। न हि भवति — दूरे प्रधानं सन्निकृष्टे व्यक्तम् इति। यदुक्तं भवति तस्मादुच्यते — यदात्मकं कार्यं भवति तदात्मकं कारणमिति। यथा शुक्लैस्तन्तुभिरारब्धः पटः शुक्लो भवति। अथ कृष्णैस् तन्तुभिः कृष्णपटो भवति। एवं महदादिलिङ्गमप्यविवेक्यादीनां गणेन वक्ष्यते। यो वा यथा व्यक्तं दृष्ट्वा तथा प्रधानं (पश्यति) स साधयति प्रधानमप्यविवेक्यादि{(:)} गणेन युक्त(म्) इति। तस्माद् (अ)व्यक्तमपि सिद्धम् एतैर्गुणैः, व्यक्तमपि तद् ॥१४॥

तदुच्यते भवता -- अविवेक्यादि(ः) सिद्धस्त्रैगुण्या(त्)द् व्यक्ते, अव्यक्तमपि सिद्धम्। अत्राह - इह लोके यन्नोपलभ्यते तन्नास्तीति। यथा, द्वितीयमनीश्वरशिरो ..... वन्ध्यापुत्रिकाभ्रूविलासादयो वा। तथा च प्रधानं नोपलभ्यते। तत् कथमवगम्यते — अस्ति प्रधानमिति॥ अत्रोच्यते — इह लोके (?) हिमवतः (उ)पलाग्रपरिमाणं नोपलभ्यमानमस्ति (एव)। अत्राह — को हेतुरिति। अत्रोच्यते —

भेदानां परिमाणात् समन्वयाच्छक्ति(तः) प्रवृत्तेश्च ।

का(र)णकार्यविभागादविभागाद्वैश्वरूप्य(स्य) ॥१५॥

अस्ति प्रधानम्। कस्मात् — भेदानां परिमाणात्। इह लोके यस्य कर्त्ता ऽस्ति तस्य परिमाणं दृष्टम्। यथा कुलालः परिमिता(त्) मृत्पिण्डाद् घटं करोति प्रस्थग्राहिणमाढकग्राहिणं वा। तथैवायं परिमितं पटं करोति तन्तुभिः। तथैवायं परिमितं पटं करोति तन्तुभिः। पञ्चपलिकं वा॥ इह च महदादिलिङ्गं परिमितम्, एका बुद्धिर् एको ऽहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि। एवमेतद् व्यक्तं परिमितं दृष्टम्। अतो ऽनुमानेन साधयामः — अस्ति तत् प्रधानं यद् इदं व्यक्तं परिमितमुत्पादयतीति। यदि प्रधानं न स्यात्, निष्परिमाणमिदं व्यक्तं स्याद् इति। भेदानां परिमाणं पश्यामः, अस्ति प्रधानं कारणमिति यद् इदं व्यक्तमुत्पादयतीति। (अ)त्र (अस्ति प्रधानम्)॥ अतश्चास्ति

प्रधानम्। कस्मात्। समन्वयात्। इह लोके समन्वयं सिद्धिर्दृष्टा, यथा कश्चिद् ब्रह्मबटुं दृष्ट्वा समनुगच्छति — नूनमस्य बटोः माता ऽपि ब्राह्मणी पिता ऽपि ब्राह्मण इति। एवं त्रिगुणं दृष्ट्वा ऽतः पश्यामो व्यक्तस्य यत्कारणं तदपि त्रिगुणं भविष्यतीति। तेन समन्वयं पश्यामः — अस्ति प्रधान(म्) इति॥ अतश्चास्ति प्रधानं, कस्मात्। शक्तितः प्रवृत्तेश्च। इह लोके यस्मिन्नेवार्थे यः शक्तः (स) तस्मिन्नेवार्थे प्रवर्त्तते। यथा कुला(लो) घटकरणे मृत्पिण्डात्। तन्तुवायः पटकरणे (तन्तुभ्यः)॥ अतः साधयामः प्रधानस्याप्यस्ति शक्तिर्यया शक्त्या {(·)} व्यक्तमुत्पाद्यते। सा च शक्तिर्निराश्रिता न भवति। तस्मादस्ति प्रधानं यतः शक्तिः प्रवर्त्तत इति तस्मादस्ति प्रधानम्॥ अतश्चास्ति प्रधा(नम्)। (कस्मात्।) कारणकार्यविभागात्। कारणं च कार्यं च **कारणकार्ये**, तयोर्विभागः कारणकार्यविभागः। तस्मात् {( )} कारणकार्यविभागात्। करोतीति कारणं क्रियत इति कार्यम्। इह लोके कारणकार्ययोर् विभागो लोके दृष्टः। मृत्तिका कारणं, घटः कार्यं मधूदकपयसां (धा)रणसमर्थो, न तु मृत्पिण्डः। तन्तवः कारणं पटः कार्यम्। न तन्तवः शीतोष्णवातप्रतिघाते (समा)र्था भवन्ति। एवमिदं महदादिलिङ्गं कार्यं दृष्ट्वा साधयामः, तद्विपरीतमन्यत् कारणं भवतीति। साधयामस्तस्मादस्ति प्रधानमिति॥ अतश्चास्ति प्रधानम्। (कस्मात्।) अविभागाद् वैश्वरूप्यस्य।

"भज सेवायाम्" (धातुपा ९९४) विपूर्वकस्य विभाग इति। तस्य नञा प्रतिषेधः क्रियते। न विभागो ऽविभागः। तस्मादविभागात्। विश्वरूपता विश्वरूपत्वं वैश्वरूप्यमिति। वैश्वरूप्यं जगत्। ते लोका इत्यर्थः। ते पंचसु भूतेष्वन्तर्भूता(ः)। तेषां हि लोकानां पृथिव्यापस्तेजो वायुराकाशमिति भूतानि तन्मात्रेषु अविभागं गच्छ(न्ति)। अविभागो नाम, अन्यत् क्षीरमन्यद् दधीतीदं तु न शक्यते वक्तुम्। इदं व्यक्तमिदं (अ)व्यक्तमिति न शक्यते वक्तुम्। मन्यामहे—अस्ति प्रधानं यस्मिन् महदादिलिङ्गमविभागं गच्छति। तस्मादस्ति प्रधानं कारणमव्यक्तमिति।

अत्राह — गृह्णीमस्तावद् अस्ति प्रधानमिति, तदिदानीमेकं भूत्वा कथं व्यक्तमुत्पादयति बहु। एकस्तन्तुः पटं नोत्पादयति। एकं वीरणं {।} कटं नोत्पादयति। एकं चेदं प्रधानं व्यक्तमुत्पादयतीति मन्यसे, न चैकं किञ्चित् कार्यमुत्पादने समर्थ(म्) इति। अत्रोच्यते —

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषा(त्) ॥१६॥

कारण(म)व्यक्तं यन्नोपलभ्यते। अव्यक्तं प्रवर्तते त्रिगुणतः। अतो ऽपि प्रधाने बहुत्वमस्ति सत्त्वरजस्तमांसि त्रयो गुणाः। तस्मात् त्रिगुणं प्रधानमुत्पादयति महदादीन्युक्तम्। किञ्चान्यत् — समुदयाच्च। यथा गङ्गास्रोत(ां)सि समुदिता(नि) महेश्वर-{।}-शिरसि निपतिता(नि){।}। यथा तन्तवः पटं कुर्वन्ति, एवं सत्त्वरजस्तमांसि समुदितास्त्रयो गुणाः प्रधानस्था (व्यक्तं) कुर्वन्ति॥ अत्राह व्यक्तस्येह लोके द्विविधोत्पत्तिर्दृष्टा। स्त्रीपुमांसौ पुत्रमुत्पादयतः। क्षीरं दध्युत्पादयति। किमेवं प्रधानं स्त्रीपुंसवद् व्यक्तमुत्पादयति, आहोस्वि(त्) क्षीरवदिति सन्देहः। अत्रोच्यते— क्षीरं दधिभावेन परिण(म)ति, यदेतत् क्षीरं (त)देव दधि। एवं प्रधानं क्षीरवत् त्रयाणां लो(का)नाम् अन्तर्भावेन परिणमति। यदेव(ो) (अ)व्यक्तं तदेव व्यक्तम्। तस्मादुच्यते परिणामत इति। अत्राह—यद्येकस्मात् कारणात् त्रयो लो(का) उत्पद्यन्ते, तेन नैकत्वं प्राप्नोति सुखिनो देवा दुःखिता मनुष्या {।} मूढास्तैर्यग्योना इति। कथमेकस्मात् कारणाद् उत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति? अत्रोच्यते — सलिलवत् पृथग्भाजनविशेषात्। कथमिति। सर्पोपभुक्तमुदकं विषभावेन परिणमति तदेव गवोपभुक्तं क्षीरभावेन, उष्ट्रोपभुक्तं मूत्रभावेन। पृथक् पृथग् भाजनविशेषात्॥ अथवा —

एकरसमन्तरिक्षात् पतति जलं तच्च मेदिनीं प्राप्य।
नानारसतां प्रतिपद्यते पृथग्भाजनविशेषात् ॥"

आकाशाद् हिरण्यभाजनेन परिगृहीतमम्भः मधुरभावेन परिणमते।

एवं त्रयो लोका एकस्मादुत्पन्ना गुणवैषम्येण पृथग्भावेन परिणमन्ते । ननु {?} देवानां सत्त्वमुत्कटं वर्त्तते, अतस्ते सुखिनः । मनुष्याणां रज उत्कटं वर्त्तते, अतस्ते दुःखिता[ः] । तिर्यग्योनिषु (तम) उत्कटत्वेन वर्त्तते, अतस्ते मूढाः । एषाम् एकस्मादुत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति । तस्मादाह —{()} (पृथग्-) भाजनविशेषात् । एवं तावत् समधिगतं प्रधानम् ॥ १६ ॥

अत ऊर्ध्वं पुरुषं समधिगमिष्यामः । कथम् ? यस्मादुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षः प्राप्यत इति । किञ्चान्यत् — यथाऽव्यक्तं पञ्चभिर्हेतुभिः समधिगतम् अप्रत्यक्षत्वात् । तथा पुरुषो नोपलभ्यते प्रधानवत्, तस्यानुपलभ्यमानस्य पञ्चभिर्हेतुभिः समधिगमं करिष्यामः सौक्ष्म्यात् । तस्मादुच्यते —

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
(पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ १७ ॥)

अस्ति पुरुषः, कस्मात् संघातपरार्थत्वात् । इह लोके सङ्घातानां परार्थता(ना)ऽपि परस्परार्थं नो(ऽ)पि निरर्थम् । किन्तु ‹अत्र› दृष्टान्तः — तद्यथा पर्यङ्कः । गात्राणां पदानां च सङ्घातः पर्यङ्क इत्युच्यते । स हि पर्यङ्को न स्वार्थं करोति ब्राह्मणवत् । यथा ब्राह्मणा ‹न› स्वमर्थं प्रतिग्रहं कुर्वन्ति । ‹न› परस्परार्थमपि कुर्वन्ति, स्त्रीपुंसवन्न भवन्ति । निरर्थं न भवितव्यम् । तद्यथा

ऽथं पूर्वेति समुत्पन्ना ‹पर्यङ्ककृतिः› । अस्मादस्ति पुरुषः, यः पर्यङ्के शेते खट्वायं यस्यार्थे पर्यङ्ककृतिः । किञ्चान्यत् — मृत्तृणकाष्ठादीनां सङ्घात(ो) गृह उच्यते स चाऽयं परार्थः तद्वदिदं शरीरं पञ्चानां(ां) भूतानां सङ्घातः । अतः पश्यामः — अस्ति पुरुषो यस्यार्थेऽयं शरीरसङ्घातः । तस्मा(दो)ऽस्ति पुरुष इति ॥ कुतः पश्यामोऽस्ति पुरुष इति ? । त्रिगुणादिविपर्ययात् त्रयो गुणा यस्य गणस्यादौ सर्वम्(ो)भिवन्ति (स त्रिगुणादिः) । त्रिगुणादिविपर्ययादस्ति पुरुष इति । त्रिगुणादिविपरीतः खलु पुरुषोऽस्ति, कश्च स त्रिगुणादिविपर्ययः ? अत्रोच्यते — उक्तं पूर्वस्यामा{()}र्यायां "त्रिगुणमविवेकि" इति, तस्मादस्ति पुरुषः ॥ अधिष्ठानात् । लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठितः प्रवर्त्तते । यद्यनधिष्ठितः प्रवर्त्तते, आत्मनो {()} विनाशाय प्रवर्त्तते । तत्र चोक्तं "पुरुषाधिष्ठितं (प्रधानं) प्रवर्त्तते" । अतः पश्यामोऽस्ति पुरुष इति येनाऽधिष्ठितं प्रधानं महदादि सम्पादयतीति, तस्मादस्ति पुरुषः । एवमेतैस्त्रिभिर्हेतुभिर् अस्ति पुरुष इति ॥ भोक्तृत्वात् । अन्यच्च पश्यामः कैवल्यार्थप्रवृत्तेश्चास्ति पुरुषः । एवमेभिः पञ्चभिर्हेतुभिः पुरुषस्याऽस्तित्वं सिद्धमिति ॥

अत्राह — गृह्णीमस्तावत् पञ्चभिर्हेतुभिः शरीरे विभक्तो पुरुषोऽस्तीति । किं खलु एकोऽयं पुरुष आहोस्वित् प्रतिशरीरं पुरुष इति । अत्रोच्यते

बहवः पुरुषा(ः) इति। कस्मात्

जन्ममरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।

पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥१८॥

जन्मनियमात् पश्यामो बहवः पुरुषा(ः)। यद्येकस्मिन् अधिष्ठाने बह्व्यः स्त्रियो गर्भिण्यस्तत्र काश्चित् प्रसूताः काश्चित् प्रसवेयातां। यद्येकः पुरुषः स्यात्, एकस्यां प्रसूतायां सर्वाः प्रसवेरन्। अतः पश्यामो बहवः पुरुषाः{( )} यद्येकः पुरुषः स्यादेकस्मिन् जीवति सर्वे जीवेरन्। एकस्मिन् मृते सर्वे म्रियेरन्। तस्मान्मरणनियमात् पश्यामो बहवः पुरुषाः। किञ्च करणनियमाच्च। करणानीन्द्रियाणि श्रोत्रादीनि। इह लोके पुरुषा दृश्यन्ते। केचिद्बधिराः केचिन्मूकाः केचिदमूकाः, एवमादि केचिदुपहतेन्द्रिया अन्ये ऽनुपहतेन्द्रियाः। अतः करणनियमात् पश्यामो बहवः पुरुषा इति। अयुगपत् प्रवृत्तेश्च। इह लोके नानाविधा प्रवृत्तिर्दृष्टा, तद्यथा — एको धर्मे एकः कामे एको ऽर्थे ऽन्यो मोक्षे। अतः पश्यामो बहवः पुरुषा इति। इतश्च बहवः पुरुषाः, त्रैगुण्यविपर्ययाच्चैव। कस्यचिद्ब्राह्मणस्य त्रयः पुत्रा एकजोत्पन्नास्तुल्यगोत्रस्वाध्याया(ः)। तत्रैकः सात्त्विकः, एको राजसः, (एकस्तामसः)। यद्येकः पुरुष(ः)स्यादेकस्मिन् सात्त्विके सर्वे सात्त्विकाः स्युः, एकस्मिन् राजसे सर्वे राजसाः स्युः,

एकस्मिन् तामसे सर्वे तामसाः स्युः। न चैको भवति। अतः पश्यामो बहवः पुरु[षा] इति। त्रैगुण्यविपर्ययात्॥ वासुदेवदर्शनान् मणिसूत्रदर्शनाच्चैकः पुरुष इति तं एवं तावत् पञ्चभिर्हेतुभिः पुरुषबहुत्वं सिद्धम् इत्याह। अस्तित्वं बहुत्वं च पुरुषाणां साधितम् ॥

अत्राह — किमयं पुरुषः कर्त्ता ऽहोस्विदकर्त्तेति। कुतः संशयः? आचार्यविप्रतिपत्तेः। कपिलासुरिप्रभृतय आचार्या ब्रुवते — अकर्त्ता पुरुषः। कणादाक्षपादप्रभृतयः कर्त्तेति। अतः संशयः। किञ्चान्यल्लोकोपचारदर्शनार्थं संशयः। लौकिका ब्रुवते पुरुषः कर्मणां कर्त्तेति; उपचारश्च — पुरुषो गच्छति {( )} पुरुषो धावति, पुरुषेण कृतम् इत्येवमादि प्रतिपत्तिः। (अतः) संशय इति।

अत्रोच्यते — अकर्त्ता पुरुषः। कस्मात्। यस्मादाह —

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।

कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥१९॥

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्येति। तस्मादिति त्रिगुणादिविपर्ययाच्चैव। सिद्धं साक्षित्वमस्य पुरुषस्य{( )}। साक्षिभावः साक्षित्वम् केवलभावः कैवल्यम्। दृष्टिभावः(द्रष्टृत्व)मिति। एवमकर्तृत्वं बोद्धव्यम्। तस्मादेवंविधात् कारणा(द्) इति। अथ व्यक्ताव्यक्तविपरीतः पुरुषः स

यस्मादुक्तस्तद्विपरीतस्तथा च पुमान् । तस्माच्च विपर्यासादकर्त्ता पुरुष इति ।
सत्त्वरजस्तमांसि त्रयो गुणाः कर्त्तारः । तस्मात्तेभ्योऽन्यः पुरुषः । साक्षिभूतो यः साक्षी ।
यस्मात् केवलस्तस्मान्मध्यस्थः । यस्मान्मध्यस्थस्तस्मादकर्त्ता । अयं चात्र दृष्टान्तः,
यथा किल परिव्राजकः, स ग्रामे प्रतिवसति, ते ग्राम्या लोकाः क्षेत्रकर्मणि प्रवर्त्तन्ते
निवर्त्तन्ते च । स परिव्राजकः केवल एव मध्यस्थः, तेषु प्रवर्त्तमानेषु न प्रवर्त्तते यस्मात्
तस्मादकर्त्तेति तेषां कर्मणाम्, एवं पुरुषः परमात्मा । सत्त्वरजस्तमांसि त्रयो ⟨गुणाः⟩
प्रवर्त्तन्ते । पुरुषः परिव्राजकवद्भृत्यगुणेभ्य इत्यर्थः । यस्मात् केवलः तस्मान्मध्यस्थः ।
यस्मान्मध्यस्थः, तस्मादकर्त्तेति । गुणाः कर्त्तार इत्यर्थः । एवं पुरुषस्यास्तित्वं बहुत्वं
च प्रसाधितम् ॥

अत्राह — यद्यकर्त्ता पुरुषः, अध्यवसायं कः करोति — धर्मं करिष्यामि,
अर्थं साधयिष्यामि (इति) । {( )} गुणा यद्यध्यवसायं करिष्यन्ति, अचेतन्या(ा)श्च
गुणा इत्युक्तम् । यद्यध्यवसायं करिष्यति पुरुषो वा {( )}, अकर्त्ता(ा) च पुरुष
इत्युक्तम् । तस्मादयं दोषः । अत उच्यते —

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥२०॥

तस्मादिति हेत्वर्थः पञ्चमी । तेन संयुक्तं किमुक्तं भवति । पुरुषश्चेतनः

प्रधानं स्यादचेतन्यता । तेन संयुक्तं चेतनेन पुरुषेणाचेतनं महदादिलिङ्गं
चेतना(ा)वद्भवति । यथा — अनुष्णा(ा)शीतो घटः शीताभिर(द्भिर)भिसंयुक्तः
शीतो भवति । यथोष्णाभिसंयुक्त उष्णो भवति । एवं महदादिलिङ्गम् अचेतनमपि
पुरुषसंयोगाच्चेत(नावत्) भवति । तस्मादध्यवसायं कुर्वन्ति गुणाः कर्मणि कार्ये,
(न) पुरुषः । किञ्चान्यत् — गुणकर्तृत्वे च तथा कर्त्ते(व) भवत्युदासीनः । अत्र
दृष्टान्तः, केचित् किल चोरा ग्रामं हत्वा कृतकार्याः स्वग्रामं गच्छन्ति,
तैश्च सह गच्छद्भिः सह कश्चिद्ब्राह्मण(ः) श्रोत्रियः पन्थानं गच्छति । ततश्चोराः
पृच्छमाना राजपुरुषैर्गृहीताः, — यूयं चोरा इति, सोऽपि ब्राह्मणो गृहीतः,
त्वमपि चोर इति । स्वमचोरोऽपि चोरसं(सो)गाच्चोरो भवति । एवमिहापि
सत्त्वरजस्तमांसि त्रयो गुणाः कर्त्तार इति तैः संयुक्तः पुरुषोऽकर्त्ताऽपि स
कर्त्तेव भवति । कर्तृसंयोगभावा(ा)त् ॥ ततश्च लोकोपचारो भवति, पुरुषो
गच्छति पुरुषो धावति पुरुषेण कृतमिति । एवं पुरुषसंसर्गादचेतनं
महदादिलिङ्गं चेतना(ा)वद्भवति । पुरुषोऽपि गुणसंसर्गादकर्त्ताऽपि सन् स
कर्त्तेव भवति । तत्र यदुक्तं पुरस्ताद्व्यक्ताव्यक्त(ज्ञवि)ज्ञाना(न्) मोक्षः प्राप्यत इति ।
तथा प्रसाधितः पुरुषधर्मोऽपि त्रिभिरार्याभिः पुरुषास्तित्वानेकात्वा(कर्तृत्वं) वेदयति ।

अत्राह — उक्तं तावत्संयोगादचेतनं महदादिलिङ्गं चेतनावद्भवति (इति) ।

उक्तं चेतनः पुरुषोऽचेतनं प्रधानम् (इति)। तथा तयोः प्रधानपुरुषयोः किंहेतुकः संयोगः॥ अत्रोच्यते —

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥२१॥

पुरुषस्य दर्शनार्थं पुरुषेण सह संयुज्यते सगुणा प्रकृतिः। इहास्ति (सा)ऽतो द्रष्टव्येति। अयमर्थः सम्पद्यते पुरुषस्य - प्रकृतिं द्रक्ष्यामीति। प्रधानस्याऽयमर्थः — अस्य तपस्विनः ज्ञाने वर्तमानस्य कैवल्यं करिष्यामीति। यथा राजा(ा) पुरुषेण सह संयुज्यते, प्रेषणं मे करिष्यतीति। पुरुषोऽपि राज्ञाऽपि संयुज्यते, वृत्तिं मे दास्यतीति। एवं यथा राजपुरुषयोरर्थहेतुकः संयोगः। एवं प्रधानपुरुषयोरपीति॥ कथमिति, (अपि) चात्र दृष्टान्तः पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः {()} सर्गः। तथा कदाचिदुज्जयिन्याः सार्थः पाटलिपुत्रं प्रस्थितः। स च सार्थश्चौरैर्हृतसर्वस्वः समन्ताज्जगाम स्वजनपरित्यक्तः। पन्थानमपश्यन् समन्तादन्ध(ः) परिभ्रममाणः पङ्गुना दृष्टः। कोऽत्र भवान्, अहं पङ्गुर्मार्गदर्शने कुशलो गन्तुमसमर्थः। अन्धेनाप्युक्तः पङ्गुः यथा भवान् तथाहमपि न शक्नोमि गन्तुमिति। मम गमनसामर्थ्यमस्ति दृक्सामर्थ्यं नास्ति। अहं स्कन्धेनादाय भवन्तं यास्यामि त्वमपि मम पन्थानं दर्शय" इति। एवं

योऽप्यर्थहेतुकः संयोगः। तद्वत्। पङ्गुवत् पुरुषो द्रष्टव्यः, अन्धवत् प्रधानम्। पुरुषे दृक्सामर्थ्यं {()} क्रियासामर्थ्यम्। तयोः कृतार्थयोर्विभागो भवति। तौ पङ्ग्वन्धौ देशान्तरं प्राप्तौ, अन्धोऽपि स्वजनेन सह सङ्ग(तः), पङ्गुरपि स्वजनेन सह सङ्गतः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते, पुरुषोऽपि प्रधानं दृष्ट्वा मोक्षगतोऽनयोस्तत्कृतः सर्गः॥

एतास्ताः चूलिकाः समाप्ताः॥

अस्तित्वमे(का)त्व(म)थार्थवत्त्वं पा(रा)र्थ्यमन्य(त्व)मथो निवृत्तिः।
योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः॥
एवमेते चूलिकार्थाः। वियोगं शेषवृत्तिमुत्तरत्र वक्ष्यामि॥२१॥

अत्राह — तत्कृतः सर्ग इत्युक्तम्। प्रधानपुरुषयोगः सर्ग उच्यते स्त्रीपुंसवत्। यथा स्त्रीपुंसयोः संयोगात् पुत्रोत्पत्तिर्भवति, एवं प्रधानपुरुषसंयोगात् सर्ग उत्पद्यते। स्त्रीपुंस(योः) संसर्गः सृष्टिरित्यर्थः। स च त्रिविधः — तत्त्वसर्गः, भावसर्गः, भूतसर्गः। सति वक्तव्ये, तत्त्वसर्गं तावद् वक्ष्यामः। कस्मात्? प्रयोजनवत्त्वात्। तस्मात् (सृ)ष्टिं वं, । महदादिलिङ्गम्, अस्योत्पत्तिं ब्रूमः। तस्मादिह पुरस्तात् तत्त्वसर्ग इत्युक्तम्। तस्य सर्गस्य कः क्रम इति। अत्रोच्यते —

प्रकृतेर्महांस्ततोऽहङ्कार(स्त)स्माद्गणश्च षोडशकः।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥२२॥

प्रकृतिर्महाप्रकृतिः प्रधानं ब्रह्म बहुधानकं पर्यायशब्दाः। तस्याः प्रकृतेः पञ्चमी विभक्तिर्भवति। प्रकृतेर्महानुत्पद्यते कश्चित्। महान्बुद्धिः मतिरिति पर्यायाः। तत्प्रधानान्(नि) महानुत्पद्यते बुद्धिरित्यर्थः। ततोऽप्यहङ्कारः, ततस्(तस्मात्) प्रकारादुत्पद्यते। तत इति तसिल् प्रत्ययः पञ्चम्या(ः)। तदर्थे। अहङ्कार(स्य) इमे पर्यायशब्दाः। अहङ्कार(ः) भूतादिस्तैजसो वैकृत इति। तस्माद्गणश्च षोडशकस्तस्मादहङ्कारात् षोडशको गण उत्पद्यते। तेषामेकादशेन्द्रियाणि पञ्च तन्मात्राणि, एष षोडशको गण इति। शब्दतन्मात्रं (स्पर्शतन्मात्रं) रूपतन्मात्रं (रसतन्मात्रं) गन्धतन्मात्रमेतानि पञ्च तन्मात्राणि गणः। बुद्धीन्द्रियाणि पञ्च। (कर्मेन्द्रियाणि पञ्च।) मनश्च। एष षोडश(को) गण इत्युच्यते। किञ्चान्यत् तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि, शब्दतन्मात्रादाकाशं स्पर्शतन्मात्राद्वायु रूपतन्मात्रात्तेजो रसतन्मात्रादापो गन्धतन्मात्रात् पृथिवी। एवं पञ्चभ्यस् तन्मात्रेभ्यः पञ्च भूतान्युत्पद्यन्त इत्यर्थः। तत्र यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षः प्राप्यत इति। एवं तद्व्यक्तं महदादिभूतपर्यन्तं (व्याख्यातम्)। अव्यक्तमपि हेतुभिर्व्याख्यातम्। ज्ञश्चापि पञ्चभिर्हेतुभिः समधिगतः। अपि चोक्तम् —

पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः।
जटी मुण्डी शिखी वापि मुच्यते नाऽत्र संशयः॥

प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतानि पुरुष इत्येवमेतानि पञ्चविंशतितत्त्वानि परिसमाप्तानि ॥२२॥

अत्राह — प्रकृतेर्महानित्युक्तम्, उत्पद्यत इति, तस्य महतः किं लक्षणमिति। अत्रोच्यते —

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥२३॥

अध्यवसायो बुद्धिः। अध्यवसायलक्षणा बुद्धिः — अयं घट इति। एतद्बुद्धेर्लक्षणम्। किञ्चान्यत् सा बुद्धिरष्टाङ्गोच्यते। अथ कान्यष्टाङ्गानि? अत्रोच्यते — चत्वारि सात्त्विकानि चत्वारि तामसानि (च)। तत्र सात्त्विकानि वक्ष्यामः। धर्मो ज्ञानं {( )} वैराग्यमैश्वर्यं (चेति) चत्वारि सात्त्विकानि। तत्र धर्मो नाम यमनियमलक्षणः। तत्र यमाः के नियमाः के?

अहिंसा ब्रह्मचर्यं च सत्यमव्यवहारता।
अस्तेयमिति पञ्चैते यमाः संपरिकीर्तिताः॥
अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम्।

अप्रमादश्च पञ्चैते नियमाः परिकीर्त्तिताः ॥

एभिः पञ्चभिर्यमैः पञ्चभिर्नियमैर्यः साध्यते स धर्मो व्याख्यातः। ज्ञानं वक्ष्यामः। ज्ञानं तु द्विविधं बाह्यमाभ्यन्तरं च। तत्र बाह्यं वीणावेणुतन्त्री- शिल्पव्याकरणादिकं व्याख्यातम्। आभ्यन्तरं गुणपुरुषान्तरज्ञानम्। अन्ये गुणाः सत्त्वरजस्तमांसि पुरुषोऽन्य इत्येतदाभ्यन्तरं ज्ञानं च व्याख्यातम्। बाह्येन ज्ञानेन लोकोपपत्तिः, आभ्यन्तरेणापवर्ग इति ज्ञानं व्याख्यातम्। वैराग्यं व्याख्यास्यामः। विरागभावो वैराग्यम्, तच्च द्विविधं बाह्यमाभ्यन्तरं च। तत्र बाह्यम्, अर्जनरक्षण(क्षि)यसंगहिंसादोषान् विदित्वा विरक्तः प्रव्रजितः। तस्य नास्ति मोक्षो बाह्येन ज्ञानेन, एतद्बाह्यम्। आभ्यन्तरं वैराग्यं वक्ष्यामः। प्रधानमन्यत् पुरुषोऽन्य इति ज्ञात्वा, दृष्टाऽऽनुश्रविकेभ्यो विषयेभ्योऽपगतः प्रव्रजितः। तस्याऽऽभ्यन्तरेण ज्ञानेन पूर्वोक्तेन वैराग्येण मोक्षः, बाह्येन संसार इति वैराग्यं व्याख्यातम्। ऐश्वर्यं व्याख्यास्यामः। तच्चैश्वर्यमष्टगुणं वर्णयन्ति। अणिमा लघिमा महिमा प्राप्तिः प्राकाम्यम् ईशित्वं वशित्वं यत्र कामावसायित्वमिति। तत्राऽणिमा— (८) अणुर्भूत्वा सूक्ष्माणि शरीराणि भूत्वा विचरति। लघिमा नाम लघु भूत्वा वायुवद् विचरति। महिमा नाम त्रिषु लोकेष्वर्चितः पूजितो भवति।

प्राप्तिर्नाम यं यं मनसा प्रार्थयति तं तं प्राप्नोति। ईशित्वं नाम त्रैलोक्यस्य प्रभुर्भूत्वा विचरति। प्राकाम्यं नाम प्रचुरकामो भवति विषयानुपभोक्तुं प्रकामं समर्थः। वशित्वं नामाऽऽत्मना वशमानयति भूतानि। (यत्र कामा)वशायित्वं नाम ब्रह्मादि(षु) स्थावरान्तेषु यत्र यत्रेच्छति गन्तुं तत्र तत्राप्रतिहतो भवति। एतानि तत्त्वाणि चत्वारि सात्त्विकानि रूपाणि। यदा सत्त्वेन रजस्तमसी अभिभूते भवतः, तदा सत्त्वबहुलो भवति। देवदत्तः सत्त्वबहुलश्च भूत्वा तान्येव प्राप्नोति। सात्त्विकानि रूपाणि व्याख्यातानि। तामसानि व्याख्यास्यामः। किञ्चान्यत्— तामसमस्माद्विपर्यस्तं तस्माद्यो विपरीतो गुणम् तामस इत्युच्यते। अधर्मोऽज्ञानं रागोऽनैश्वर्यम् इत्येतानि तामसानि रूपाणि भवन्ति। तत्र धर्मो व्याख्यातः— यमनियमलक्षणः। तद्विपरीतोऽधर्मो हिंसादिसाधनजनितः। ज्ञानं व्याख्यातम्— बाह्यमाभ्यन्तरं चेति, तद्विपरीतमज्ञानम्। वैराग्यं द्विविधम् उक्तम्, तद्विपरीतमवैराग्यम्। अष्टगुणमैश्वर्यं व्याख्यातम्, तद्विपरीतमष्टविधमनै= श्वर्यम्। एवं चतुर्भिः सात्त्विकैश्चतुर्भिस्तामसैर्युक्ता बुद्धिरष्टाङ्गा प्रकृतेरुत्पद्यते ॥ २३॥

उक्तं च बुद्धिलक्षणम्, अहङ्कारस्य लक्षणं वक्ष्यामः। तदुच्यते—

(अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः।

एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥२४॥)

अभिमानोऽहङ्कारः, योऽयमभिमानः — शब्देऽहं गन्धेऽहं शुभगोऽहं दर्शनीयोऽहम् अभिजनवान् ऐश्वर्यवानहम् । एषोऽभिमानलक्षणोऽहङ्कारः। तस्मादहङ्काराद्द्विविधः प्रवर्त्तते सर्गो द्विप्रकार इत्यर्थः। कतमस्य गणस्य कश्च सर्गः ? एकादशकस्य गणस्य सर्गः। एकादशकश्चेन्द्रियगणः। किमिन्द्रियगणस्य नेति ? उच्यते — तन्मात्रपञ्चकश्चैव। तन्मात्रपञ्चकस्यैव सर्गः। तत्रैकादशेन्द्रियाणि (पञ्च तन्मात्राणि च) व्याख्यातानि ॥२४॥

पूर्वमेवाऽहङ्कारस्य लक्षणं व्याख्यातम्। अत्राह — अहङ्कारस्य त्रिविधस्य कथ्यते, वैकारिकस्तैजसो भूतादिरिति। कतमस्मादहङ्कारादिन्द्रियाण्युत्पद्य(न्)ते ? कतमस्मात्तन्मात्राणि ? अत्रोच्यते —

सात्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्।

भूतादेस्तन्मात्रः (स) तामसस्तैजसादुभयम् ॥२५॥

सात्विक एकादशकः प्रवर्त्तते। यदा सत्त्वोत्कटो भवत्यहङ्कारः, अहङ्कारस्थेन (सत्त्वेन) रजस्तमस्यभिभूते भवतः, तदा सात्विकोऽहङ्कार इत्युच्यते। तस्य सात्विकस्याऽहङ्कारस्य पूर्वाचार्यैः संज्ञा कृता भवति

वैकारिक इति। वैकृतोऽहङ्कार एकादशेन्द्रियाण्युत्पादयति। तस्मात् सात्विकानीन्द्रियाणि विशुद्धानि विषयग्रहणसमर्थानि भवन्ति। तस्मादुच्यते- सात्विक एकादशको गणः प्रवर्त्तते वैकृताद(दो)हङ्कारात्। अत्राह — तन्मात्रसर्गः कुत उत्पद्यते ? अत्रोच्यते — भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्। यदा भूतादिस्तमो बहुलो भवत्यहङ्कारः, अहङ्कारस्थेन तमसा सत्त्वरजस्यभिभूते तदा तमो(ो) बहुलोऽहङ्कार इत्युच्यते। यस्य तामसस्याहङ्कारस्य पूर्वाचार्यैः संज्ञा कृता (भवति भूता)दिरिति। तस्माद्भूतादि{()}र्भूत्वाऽहङ्कारः पञ्च तन्मात्राण्युत्पादयति तस्मात्तामसानि तन्मात्राणि च भूतानि च। तैजसादुभयम्। यदा रज-उत्कटो भवत्यहङ्कारः, अहङ्कारस्थितेनैव रजसा सत्त्वतमस्यभिभूते भवतः तदा तस्य पूर्वाचार्यैः संज्ञा कृता तैजस इति। अस्मादुच्यते तैजसादुभयमिति। कथितं योऽयं सात्विको भवत्यहङ्कारः यदा वैकृतको भूत्वा इन्द्रियाण्युत्पादयति। तदा तैजसमहङ्कारं सहायं गृह्णाति। यस्मात्तैजसे क्रियाऽस्तीति। सात्विकेन तैजसः संयुक्त इन्द्रियाण्युत्पादयति। एवं सात्विकोऽहङ्कारो राजसेन प्रेर्यते। सोऽयं तामसो भूतादिसंज्ञितोऽहङ्कारो यदा तन्मात्राण्युत्पादयति तदा तमेव तैजसं सहायं गृह्णाति। एवं सात्त्विके तस्मिन् क्रिया<न>अस्ति <इति> निष्क्रियः। तामस एकाकी न शक्त उत्पादयितुं तन्मात्राणि। ततस्तैजसेन

क्रियावता संयुक्तस्तन्मात्राण्युत्पादयति। तदा(नीं)मेवं {(.)} (तामसो ऽहङ्कारः) तैजसेना ऽहङ्कारेण प्रेर्यते। एवं तैजसेना ऽहङ्कारेणेन्द्रियाणि कृतानि भवन्ति तन्मात्राणि च। उभयप्रवर्त्तकत्वात्। तस्मादुच्यते तैजसादुभयमिति ॥२५॥

अत्रा ऽहङ्कारा(द्) एकादशको गण उत्पद्यत इत्युक्तम् {(.)}, तस्य गणस्य संज्ञा विधेयेति। अत्रोच्यते —

बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरस(न)स्पर्शनानि।
वाक्पाणिपादपायूपस्था(ः) कर्मेन्द्रियाण्याहुः ॥२६॥

बुद्धीन्द्रियाणि तेषामेकादशानामिन्द्रियाणां यान्यादौ तानि बुद्धीन्द्रियाणि भवन्ति। स्वं स्वं विषयं बुध्यन्त इति बुद्धीन्द्रियाणि। तेषां पञ्चानाम् इयं संज्ञा भवति — चक्षुः-श्रोत्र-(घ्राण)-रस(न)-स्पर्शनानि। अथ कर्मेन्द्रियाणां कतमा संज्ञा भवति, वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः। स्वं स्वं कर्म कुर्वन्तीति कर्मेन्द्रियाणि। एवमेतानि पञ्च बुद्धीन्द्रियाणि {(.)} चक्षुरादीनि रूपादिविषय(नियो)तानि। पञ्चकर्मेन्द्रिया(णि) वागादिविषयनियतानि। तत्र कर्मेन्द्रियाणां वृत्तिः। वाक् (पदो) पदार्थश्लोकानुच्चारयति, एतद्वा(क्क)र्म। व्यायामकर्मा(ा)णि हस्तौ कुरुतः। एतद्धस्तयोः कर्म भवति। एवं निम्नोन्नतेषु विहरणं भूप्रदेशे(षु) पादौ कुरुतः। एतत् पादयोः कर्म। भुक्तमाहारमुत्सृजत्येतत्

पा(.)योः कर्म। आनन्दं करोत्युपस्थः पुत्रांश्चोत्पादयत्येतदुपस्थकर्म। इत्येवमेतानि पञ्च कर्मेन्द्रियाणि। पञ्च बुद्धीन्द्रियाणि चक्षुरादिभिः (यथा) संज्ञा भवन्ति तथा विहितानि ॥२६॥

अत्राह — अथ मनः किं लक्षणं किमात्मकं चेति। अत्रोच्यते —

संकल्प(कि)मत्र मनस्तच्चेन्द्रियमुभयथा समा(.)ख्यातम्।
अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत् ॥२७॥ (अ)

संकल्पकं विचार, इत्यर्थः। अ(त्र)मन इन्द्रियगणस्य यः संकल्पस्तन्मन किमुक्तं भवति, संकल्पाध्यवसायलक्षणं मनः। तच्चेन्द्रियम्

उभयात्मकः {(.)} (अत्र) [मनः संकल्पकम् इन्द्रियं च] (साधर्म्यात्)।
गुणपरिणामविशेषा(न्) नानात्वं बाह्यभेदा(ा)श्च ॥२७॥ (आ)

उभयात्मका(म्) इति द्विविध(मि) इत्यर्थः, कर्मेन्द्रियेष्वपि कर्मेन्द्रियं बुद्धीन्द्रियेष्वपि बुद्धीन्द्रियं मनः।

उभयथा समाख्यातम्, उभयेन प्रकारेणेत्यर्थः। कथं — यस्माद् बुद्धीन्द्रियाणि च संकल्पयति च कर्मेन्द्रियाणि च। तस्मादुभयात्मकं मनः। कथं — यथा कश्चिद्देवदत्तो मल्लेषु मल्लः, गोपालेषु गोपालः, तद्वन्मनः। किञ्चान्यत — समाख्यातं, बुद्धीन्द्रियकर्मेन्द्रियाणां साधर्म्यमित्यर्थः।

यस्मात् सात्त्विकादहङ्कारात् बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च, तस्मादेव मन उभयप्रकारं भवति, बुद्धीन्द्रिय(प्रवृत्तिः कर्मेन्द्रियो)प्रवृत्तिश्चेति। तत्र बुद्धीन्द्रियप्रवृत्तेः शब्दादयो (विषया(ः)), कर्मेन्द्रियाणामपि प्रवृत्तिर्व्याख्याता वचनादयः।

अन्यच्च मनस्तु संकल्पो वृत्तिः। यथा कश्चिद्वटुः शृणोति ग्रामान्तर आमन्त्रणमिति तत्र यास्यामि – एष संकल्पो मनसो व्यावृत्तिः। तस्मादुच्यते –

संकल्पकम् इन्द्रियं च मन इति। अ(न्ये)तस्त्रिकालविषयम् इत्यर्थः। तस्माद् उभयप्रचारं तत्॥ अत्राह — एतान्येकादशेन्द्रियाणि केन कृतानि, पुरुषेणाऽहोस्विदीश्वरेण स्वभावेन (वा) इति। कुत आशङ्केति, आचार्याणां विप्रतिपत्तेः। इह केचिदाचार्याः पौरुषाणीन्द्रियाणि वर्णयन्ते। तस्माच्चैतन्यं पुरुषस्य, अचेतनं प्रधानम्। इम एवैकादशेन्द्रियार्थास्ततस् तेषामेकादशानाम् एकादशग्राहकाणामिन्द्रियाणाम्। तस्मात् पुरुषेण कृतानीन्द्रियाणीति नाहङ्कारेणेति। तथा ईश्वरेणापि। अपर ऐश्वराणीन्द्रियाणि। तस्मात् प्राकृतिकाचैतन्यात्। यास्तु एवाष्टौ प्रकृतयस् ता अचेतना(ः)। किञ्चान्यत् पुरुषा(ा)द्विपरीतश्चान्योऽस्ति सर्वज्ञः, तेनैतानीन्द्रियाणि कृतानि यश्चासौ भगवानीश्वरः। कर्ता स्वरेत्र इति। तस्मादीश्वराणीन्द्रियाणीति॥ स्वाभाविकानीन्द्रियाणीति। उक्तं च —

येन शुक्लीकृता हंसाः शुकाश्च हरिती(कृ)ताः।
बर्हिणाश्चित्रिता येन स नो वृत्तिं विधास्यति॥ {(.)} (इति)॥

अत आशङ्केति॥ अत्रोच्यते — {(.)} शास्त्रे साङ्ख्यपुरुषोऽप्यशरणम् ईश्वरोऽप्यकारणं स्वभावो नाम (च) नैव कश्चित् {(.)} पदार्थोऽस्ति। अत उच्यते — गुणपरिणामविशेषा(न्) नानात्वम्। नानाविधो भावो नानात्व (प्रधानस्थानि) सत्त्वरजस्तमांसि यथा परिणमन्ति, अहङ्कारस्था गुणाः परिणमन्ति। इम एकादशेन्द्रियार्था (भिन्नाः। शब्दादयः (पञ्चानां) वचनादयः पञ्च(ानां) संकल्पश्च (मनसः))। एवमेकादशेन्द्रियार्थाः। तेषामेकादशेन्द्रिया(णि) भवन्ति। ते च गुणाः परिणमन्ति॥ यदप्युक्तमचैतन्या प्रवृत्तिर् (इति) तद् अयुक्तम्॥ तत्र ब्रूमः — अचेतना(ना)मपि प्रवृत्तिर्दृष्टा शास्त्रे वक्ष्यतीति। तस्मादचेतना गुणा एकादशेन्द्रियभावेन परिणमन्ति। अत्राह गृह्णीमस् तावदेकादशेन्द्रियाण्यहङ्कारादुत्पन्नानि। यथास्थाननिक्षेपः केन कृत{.} इन्द्रिय(ाणा)मिति। चक्षुरुच्चैः सन्निविष्टम् आलोचनसमर्थं भवति। शिरःप्रदेशे श्रोत्रं सन्निविष्टं दूराच्छ्रवणसमर्थं भविष्यतीति। त्वक् शरीरान्तः बहिश्च सन्निविष्टा नानास्पर्शग्रहणसमर्था भवति। वागन्तर्मुखे सन्निविष्ट पदपदार्थश्लोकानुच्चारयति। हस्तौ शाखान्तरे सन्निविष्टौ

नानाशिल्पव्यायामसमर्थौ। अधः पादौ सन्निविष्टौ समविषमभूमिप्रदेशेषु विहरणसमर्थौ। पायूपस्थौ गुह्यप्रदेशे सन्निविष्टौ नित्यं दर्शनपरीहारसमर्थौ। अयं निक्षेप इन्द्रियाणां कृतः पुरुषेण, ईश्वरेण वा स्वभावेन वा। एतच्छिष्यस्य वचनम्। ईश्वरोऽप्यकारणं पुरुषोऽप्यकारणं स्वभावो नैव कश्चित् पदार्थोऽस्ति। प्रधानमेव। अहङ्कारस्थैः सत्त्वरजस्तमोभिस्त्रिभिर्गुणैः ⟨च⟩ निक्षेपः कृतः। एतोऽस्माद्ब्रवीमि गुणपरिणामविशेषादेवेन्द्रियाणां बहिर्भेदादेव निक्षेप इति ॥२७॥

अत्राह — कतमस्येन्द्रियस्य का वृत्तिरिति। अत्राह —

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम् ॥२८॥

रूपादिषु पञ्चानाम्, रूपमादौ येषां भवति ⟨इति रूपादिः⟩। रूपादयो रूपरसगन्धशब्दस्पर्शा इत्यर्थः। तेषु पञ्चसु विषयेषु पञ्चानाम् आलोचनमात्रमिष्यते वृत्तिः। आलोचनं ग्रहणमित्यर्थः। मात्रशब्दो ऽविशेषव्यावृत्त्यर्थः। तद्यथा भैक्षमात्रम् अस्मिन् ग्रामे लभ्यते। नान्यदाऽऽमन्त्रणादि। अयमर्थः कर्मेन्द्रियाण्याददानीति एतत् प्रयोजनं मात्रस्य। तत्र चक्षुषो रूपं विषयः, श्रोत्रस्य शब्दः, त्वचः स्पर्शः, जिह्वाया रसः, घ्राणेन्द्रियस्य

गन्धः बुद्धीन्द्रियाणां वृत्तिः। अथ कर्मेन्द्रियाणां वाचो वचनम्, उपस्थस्यानन्द, पाय्वोः विसर्गः, हस्तयोः कर्त्तव्यम्, विहरणं पादयोः। एषां कर्मेन्द्रियाणां वृत्तिर्व्याख्याता ॥२८॥

अथान्तःकरणस्य वृत्तिरिति। अत्रोच्यते —

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवति[अ]सामान्या{।}।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥

स्वालक्षण्यं वृत्तिः। किमुक्तं भवति। अध्यवसायो बुद्धेर्लक्षणम् उक्तं पूर्वम्। अध्यवसाय एव बुद्धेर्वृत्तिः। अभिमानोऽहङ्कारस्यैव लक्षणमित्युक्तम्। अभिमान एव तस्य वृत्तिः। सैषा भवत्यसामान्या। या सा प्रागभिहिता ⟨सा⟩ बुद्धीन्द्रियाणां, न कर्मेन्द्रियाणाम्। याऽपि कर्मेन्द्रियाणां वृत्तिः साऽपि कर्मेन्द्रियाणामेव, न बुद्धीन्द्रियाणाम्{।}। अध्यवसायो (ऽभिमानः सं)कल्पश्च बुद्ध्यहङ्कारमनसां वृत्तयोऽभिहिताः। सैषा भवत्यसामान्या — अध्यवसायो बुद्धेरेव, अभिमानोऽहङ्कारस्यैव, संकल्पो मनस एव यस्मात् तस्मादुक्तं भवत्यसामान्या। अत्राह — निःसामान्येत्युक्तम्। अर्थाद्गम्यते सामान्यकरणवृत्तिरप्यस्तीति। को दृष्टान्तः मल्लदासीवत्। मल्लानां गणस्यैवैका दासी सामान्याऽस्ति यास्तेषामन्या

गृहे कुलस्त्रियः, तासामसामान्या(त्वा)त्। एवमिन्द्रियाणामपि निःसामान्या प्रवृत्तिः कुलस्त्रीस्थानीया व्याख्याता। अत ऊर्द्ध्वं सामान्यां सर्वेषामिन्द्रियाणां वृत्तिं व्याख्यास्यामः। तदुच्यते — सामान्यकरणवृत्ति(ः) प्राणाद्या वायवः पञ्च। प्राणो ऽपानः समान उदानो (व्यानश्चेति। एते वायवः सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। तत्र प्राणो नाम मुखनासिकाभ्यां निसृतः। बाह्ये च विषये प्रवृत्तः प्राण इत्युच्यते। मुखेन च नासिकया च यो निर्गच्छति बाह्ये च विषये प्रवृत्तः, पर्वतमारोक्ष्यामि ग्रामं यास्यामीति स प्राणो मन्तव्यः। अत्राह तस्मिन् प्राणे यत्तत्स्पन्दनकर्म तत् केनेन्द्रियेण (कृ)तमिति। अत्रोच्यते त्रयोदशविधेन करणेन तत्कृतमिति। तस्मिन् प्राणे यत्तत्कर्म तत्सर्वकरणग्रामस्य सामान्या वृत्तिरिति। अपि चात्र दृष्टान्तः, कस्मिंश्चिद्राजगृहे पञ्जरे शुका(ः) प्रतिवस(न्)ति। तेभ्यो देवदत्तेनौदनो दर्शितः। त ओदनं दृष्ट्वा प्रचलिताः, पञ्जरमपि प्रचलित(म्)। यत्तत् पञ्जरस्य चलनं कर्म तत् सर्वेषां शुकानां सामान्य(म्)। तद्वत् प्राणे यत्तत्कर्म तत्सर्वेषामिन्द्रियाणां सामान्यम्। किञ्चान्यत् — अपनयनादपान(ः)। कुतश्चिदपक्रमणादपान इत्युच्यते। अपानप्रायश्च देवदत्तः सर्पं दृष्ट्वा ऽपक्रमणं करोति। तस्मादपाने यत्तत् स्पन्दनकर्म तत्सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। किञ्चान्यत् — ऊर्द्ध्वारोहण

उन्नयन उत्कर्षो वा(ऽ) प्रवृत्तिरुदान इत्युच्यते। उदानप्रायश्च देवदत्त आत्मोत्कर्षं च मृगयते। अयमाढ्यो ऽहमाढ्यतरः कथं स्यामित्येषोदान(ः)। उदानेन यत्तत्स्पन्दनकर्म तत्सर्वेषामिन्द्रियाणां सामान्या वृत्तिः। हृद्यवस्थानं सहभावश्च, तेन विचिकित्समान(ः) (समान) इत्युच्यते। यो वायुर्हृद्देशे वर्त्तमान(ः) (स) समान(ः)। (तद्)बहु(लो)श्च देवदत्त एकाकी न रमते {।}, एष समानः। यत्तत्कर्म तत्सर्वेषामिन्द्रियाणां सामान्या वृत्तिः। किञ्चान्यत् — शरीरप्राप्तिरत्यन्तं विनाभावश्च, तद् व्यान इत्युच्यते। यः शरीरे व्याप्य वर्त्तते {।} कृत्स्ने शरीर आ नखा(दा) केशात् स व्यान(ः)। (तद्)बहुलो देवदत्तो ऽन्योन्येन विना न रमते मृगवत्। तस्मिंश्च तु स्पन्दनकर्म तत्सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। एवमेते पञ्च वायवस् त्रयोदशविधस्य करणस्य वृत्तिः ॥२९॥

{।} <करणानां> निःसामान्या वृत्तिरेवं तावत्, करणानां च सामान्या वृत्तिर्व्याख्याता। अत ऊर्द्ध्वं युगपद्वृत्तिरयुगपच्च वृत्तिर्व्याख्याता। त एव

(युगपच्च) चतुष्टयस्य तु वृत्ति(ः) क्रमश(शो)श्च तस्य निर्दिष्टा।
दृष्टे तथा ऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥३०॥

युगपदिति काले (एके)कत्र निपातः। चतुर्णां तावद् यथा बुद्धिरहङ्कारो मनश्चक्षुरित्येतानि युगपद् <रूपं> पश्यन्ति। बुद्धिरहङ्कारो मनस्त्वगिति

⟨एतानि⟩ युगपत् स्पर्शं गृह्णन्ति। बुद्धिरहङ्कारो मनो जिह्वा(।) युगपद्रसं गृह्णन्ति। बुद्धिरहङ्कारो मनो नासिका युगपद् गन्धं गृह्णन्ति, एवमेषां युगपच्चतुष्टयस्य तु वृत्तिर्निर्दिष्टा। तस्यैव चतुष्टयस्य क्रमशोऽपि वृत्तिर् (अ)युगपदित्यर्थः। देवदत्तः पन्थानं गच्छति, स्थाणुं पश्यति, तत्रास्य बुद्धिर्भवेत् स्थाणुरयं पुरुषो(वा) स्यादिति। स तस्मिन् स्थाणौ वल्लीं पश्यति, अथवा ऽऽकुञ्चनगमनप्रसारण(।)शनकर्माणि पश्यति। अतोऽस्य बुद्धिर्भवति पुरुष इति। एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा। (यथा) रूपे तथा शब्दादिष्वपि {(।)} क्रमशो वृत्तिर्दृष्टा। किञ्चान्यत् -- दृष्टे तथाऽप्यदृष्टे। अस्मिन् ⟨दृष्टे⟩ स्थाणौ {(।)} क्रमश्च वृत्तिर्भवति युगपद्(च)। अदृष्टे वक्ष्यामः। तदुच्यते — अनागतेऽपि काले बुद्ध्यहङ्कारमनसां युगपद्वृत्तिः। तेषामेव त्रयाणां शब्दे श्रोत्रपूर्विका वृत्तिः। तेषामेव त्रयाणां स्पर्शे च (त्वक्)पूर्विका वृत्तिः। तेषामेव त्रयाणां रसे जिह्वापूर्विका वृत्तिः। तेषामेव त्रयाणां गन्धे घ्राणपूर्विका वृत्तिः। तेषामेव त्रयाणां त्रयस्य बुद्ध्यहङ्कारमनसाम् ॥३०॥

एतानि करणानि स्वं स्वं विषयं कथं प्रतिपद्यन्ते, {(।)} ⟨यदि⟩ एतानि पुरुषेणेश्वरेण वाऽधिष्ठितानीति। अत्रोच्यते .

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।

पुरुषार्थ एव हेतुर् न केनचित् कार्यते करणम् ॥३१॥

स्वां स्वामिति वीप्सा। नानाविधानामधिकरणानां {(।)} जन्मगुणानां युगपत् प्रयोक्तुमीप्सा। यथा गृहे गृहे गन्धर्व इत्युक्ते कृत्स्नस्य नगरस्य ग्रहणं कृतं भवति, एवं स्वां(।) स्वामित्युक्ते त्रयोदशविधस्य करणस्य ग्रहणं कृतं भवति। तत्र दृष्टान्तः कश्चित् किल ब्रह्मचारी बटुः ग्रामान्तरं आमन्त्रणं शृणोति तस्य बुद्धिरध्यवसायं करोति तत्र यास्यामीति। तत्र {(।)} आकूतमिङ्गितं चेष्टमध्यवसाय इति पर्यायाः)। अहङ्कारो बुद्धेराकूतं ज्ञात्वाऽभिमानं प्र(ति)पद्यते। मोदका(न्)मानयिष्यामीति भव्योदनं चेति। अहङ्कारस्याकूतं ज्ञात्वा मनः संकल्पं प्रतिपद्यते। गुडोदनं वा स्याद् दध्योदनं (वा) स्यादिति। एवं त्रयस्या(कू)तं ज्ञात्वा बाह्यान्यपि करणानि स्वां स्वां वृत्तिं प्रतिपद्यन्ते। चक्षुः पन्थानं पश्यति, श्रोत्रं प्रतिवचनं शृणोति, हस्तः कुण्डिकादाने प्रतिपद्यते, पादौ विहरणे। अपि चात्र दृष्टान्तः किंचित् किल चोरशतं ग्रामं हन्तुमिच्छति। चोरसेनापतिना सङ्केतः क्रियते। {(।)} यदि कश्चिद् हाहेति ब्रवीति, प्रविशन्तु भवन्तः। अथ (अहा)हेति (ब्रवीति, नि)र्गच्छन्तु वा {(।)}। चोरसेनापतिस्थानीया बुद्धि(ः) चोरस्थानी(यानी)न्द्रियाणि। बुद्धेराकूतं ज्ञात्वा स्वं स्वं विषयं प्रतिपद्यन्ते। अत उक्तं स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां

वृत्तिम् । अत्राह — इन्द्रियाणि किं स्वार्थं विषयं प्रतिपद्यन्ते (आहोस्वित् परार्थमिति)

यदप्युक्तम् — अचेतनानि (करणानि) कथं प्रतिपद्यन्त इति । (न) पुरुषेणाऽधि-
ष्ठिता(नि), ईश्वरेणा(पि) नेति । पुरुषार्थहेतुर्न केनचित् कार्यते करणम् । नापीश्वरेण
न पुरुषेण, स्वयमेव स्वे स्वे विषये प्रवर्त्तते त्रयोदशविधं करणम् ॥ ३१ ॥

अत्राह न केनचित् कार्यते करणमित्युक्तम्, अथ कतिविधं करणमिति ।

अत्रोच्यते —

(करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥)

करणं त्रयोदशविधं बोद्धव्यं, पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि
बुद्धिरहङ्कारो मन इति । एतत् त्रयोदशविधं करणं किं करोतीति । अत्रोच्यते —
(तदाहरणधारणप्रकाशकरम् — आहरणं) धारणं (च) कर्मेन्द्रियाणि कुर्वन्ति,
प्रकाशं (च) बुद्धीन्द्रियाणि कुर्वन्ति । {(।)} (अत्राह —) किं तदस्ति यस्याऽऽहरणं धारणं
प्रकाशनं (च) क्रियत इति । अत्रोच्यते — कार्यं च तस्य दशधाऽऽहार्यं धार्यं
प्रकाश्यं च । कार्यमिति शब्दस्पर्शरसरूपगन्धाः पञ्च, वचन(ा)दानविहरणोत्सर्गा-
नन्दास्तु पञ्च{(।)}। एते{(।)} (दश) विषयाः कार्यमित्युच्यते । तं दशविधं विषयं बुद्धीन्द्रियैः
प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारय(न्त्)ीति चेति ॥ ३२ ॥

अथ(-----) कतीन्द्रियाणि (त्रि)कालविषयाणि कति वा साम्प्रतकालविषयाणि
अत्रोच्यते —

अन्त(ःक)रणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालम(ा)भ्यन्तरं करणम् ॥ ३३ ॥

अन्तःकरणं बुद्ध्यहङ्कारमनसां ग्रहणम् । एतत् त्रिकालमन्तःकरणमि-
त्युच्यते । दशधा बाह्यमिति पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाण्येतद्दशविधं
बाह्यम् इत्युच्यते । किञ्चान्यत् — त्रयस्य विषयाख्यं बुद्ध्यहङ्कारमनसां
त्रयाणामाभ्यन्तरकरणानां बाह्यं दशविधं विषयाख्यं विषयोपभोज्यमृत्यभूतं
दासभूतमित्यर्थः । अ(ा)भ्यन्तरं स्वामिभूतमिति त्रिकालम् । साम्प्रतकालविषयं
बाह्यम् । कथं साम्प्रतकालविषयं (बाह्यम्) । श्रोत्रं वर्त्तमानं शब्दं शृणोति,
अतीतमनागतं च न शृणोति । त्वगपि वर्त्तमानं स्पर्शं गृह्णाति, अतीतमनागत-
(च न) गृह्णाति । नासिकाऽपि गन्धं गृह्णाति वर्त्तमानम्, अतीतमनागतं
(च न) गृह्णाति । जिह्वाऽपि वर्त्तमानरसं गृह्णाति, अतीतमनागतं च {(।)} न गृह्णाति
चक्षुरपि वर्त्तमानं रूपं पश्यति, अतीतमनागतं (च) न गृह्णाति । एवं पादौ पायुः
उपस्थश्चेति ॥ किञ्चान्यत् त्रिकालम(ा)भ्यन्तरं करणमिति बुद्ध्यहङ्कारमनांसि
त्रिकालविषयाणि । बुद्धिर्वर्त्तमानं बुध्यते, अतीतमनागतं वा । तथाऽहङ्कारो

वर्त्तमाने विषये ऽभिमानं करोतीति, अतीते ऽनागते वा । सुखितो ऽहं दुःखितो ऽहमिति मनो वर्त्तमानं विषयं स्मरति, अतीतमनागतं (च) स्मरति । तस्मादुच्यते -- त्रिकालम(ा)भ्यन्तरं करणमिति ॥ ३३॥

अथ कानीन्द्रियाणि सविशेषं विषयं गृह्णन्ति । अत्रोच्यते —

(बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।

वाग्भवति शब्दविषया शेषाण्यपि पञ्चविषयाणि ॥३४॥)

बुद्धीन्द्रियाणि तेषां येषां करणानामयमधिका(ा)रो वर्त्तते । तेषां बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च विषया(न्) गृह्णन्ति सविशेषा(न्) विशेषा(न्){{।}}। देवानां पञ्च (नि)र्वि(ि)शेषाः सुखलक्षणा एव । दुःखमोहौ विषये न स्त इति । इह मानुषाणां त एव शब्दस्पर्शरूपरसगन्धाः सविशेषा(ः) सुखो दुःखमोह(ः) <युक्ता> इत्यर्थः । देवानां बुद्धीन्द्रियाणि निर्विशेषविषयं प्रकाशयन्ति । मानुषाणां बुद्धीन्द्रियाणि सविशेषविषयं प्रकाशयन्ति । तस्माद् उच्यते — बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि । उक्तानि {।} बुद्धीन्द्रियाणि <देवानां मानुषाणां च ।>(कर्मेन्द्रियाणि) वक्ष्यामः । वाग्भवति शब्दविषया शेषाण्यपि पञ्चविषयाणि । तत्र देवानां वाक् पदपदार्थश्लोकान् उच्चारयति । अस्माकमपि तथैव । तस्माद्देवानां {।} वागिन्द्रियमस्माकं च

तुल्यम् । किञ्चान्यत् — शेषाण्यपि (पञ्च) विषयाणि । कानि तानि च शेषाणि वाक् <व्यतिरिक्ताः> पाणि(पादपा)यूपस्थाः । एते <पञ्च> विषयास्तेषां सन्ति <इति तानि भवन्ति पञ्चविषया(णि) इति । <पञ्चविषयाणीति> किमुक्तं भवति । तेषां चतुर्णामेकमेकमिन्द्रियं पञ्चविषयम् । पाणिस्तावत् शब्द-स्पर्श-रूप-रस-गन्धवान् । <.....> । पञ्चलक्षणं पादेन्द्रियं शब्दस्पर्श(रूपरसगन्ध)वत्यां भुवि {।} <विहरति> । किञ्चान्यत् शब्दस्पर्शरूपरसगन्धलक्षणः पायुरुपस्थप्रदेशे पञ्चलक्ष <.......> । तत्र पञ्चलक्षणादुप(ा)स्थप्रदेशादुपस्थेन्द्रियं {।} पञ्चलक्षणं शुक्रं विसृज शुक्रमपि शब्दस्पर्शरूपरसगन्धलक्षणवत् । एवमेतानि चत्वारि रूपाणि (पाणि)पादपायूपस्थानि कर्मेन्द्रियाणि पञ्चलक्षणानि स्थितानि पञ्चलक्षणविषयं गृह्णन्ति तस्मात् पञ्चलक्षणविषयाणि भवन्ति ॥

किञ्चान्यत् — इन्द्रियलक्षणमिति, अत्रोच्यते ---

सान्त(ः)करणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।

तस्मात् त्रिविधं करणं (द्वारि) द्वाराणि {।} शेषाणि ॥ ३५ ॥

सान्तःकरणेति । अहङ्कारो मनस्(चान्तः)करणम्, ताभ्यां सह वर्त्तते बुद्धिः सा भवति सान्तःकरणा । सर्वं विषयमवगाहते यस्माद् गृह्णातीत्यर्थः । त्रिषु लोकेषु यो विषय(ः) मनसा ऽहङ्कारेण च संयुक्ता बुद्धि(स्तं) गृह्णाति । काश्च

स विषयः। शब्दस्पर्शरसरूपगन्धाः (इति)। विषयग्रहणं तस्मादुच्यते त्रिविधं करणं द्वारि। बुद्धिरहङ्कारो मन इति, एतत् त्रिविधं करणं द्वारि। द्वाराणि येषां तत् त्रिविधं द्वारि। अत्र (द्वाराणि) शेषाणीत्युक्तम्। अथ कानि द्वाराणीति, उच्यते शेषाणि पञ्च बुद्धीन्द्रियाणि पञ्चकर्मेन्द्रियाणि (च)। एतैर्दशभिर्द्वारैस् त्रिष्वपि लोकेषु यो विषयस्तं गृह्णातीत्यर्थः॥ ३५॥

किञ्चान्यत् —

(एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।

कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्(ति)॥३६॥

एवमेव पूर्वोक्तान्येकादशेन्द्रियाण्य् अहङ्कारश्चैतेषां पूर्वोक्तानां ग्रहणं करोति (इति) एतानीति वक्तव्यं {।} इति (चेत्), गुण(विशेषान्) वक्ष्यतीति (तद्) हि न वक्तव्यम्। गुणविशेषा इति। गुणाः सत्त्वरजस्तमांसि तेभ्य उत्पन्ना गुणविशेषाः। विशेषशब्दः पुंलिङ्गस्तस्मादेत{।} इति वक्तव्यम्। प्रदीपकल्पाः प्रदीपेन तुल्याः। प्रदीपकल्पा यथा प्रदीपः। गर्भगृहे {।} कृतः (प्रदीपः) घटादीनर्थान् प्रकाशयति, एवमिन्द्रियम्। त्रिष्वपि लोकेषु यो विषयस्तं प्रकाशयति, तस्मात् प्रदीपकल्पाः। किञ्चान्यत्, परस्परविलक्षणाः परस्परेणासदृशा इत्यर्थः। श्रोत्रं शब्दं गृह्णाति न स्पर्शं न रूपं न रसं

न गन्धम्। त्वक् स्पर्शं गृह्णाति न शब्दादि। जिह्वा रसं गृह्णाति न शब्दादि। घ्राणेन्द्रियं गन्धं गृह्णाति न शब्दादि। स्वे स्वे विषये व्यवस्थितानीत्यर्थः। कुलस्त्रीवत्। तथा कर्मेन्द्रियाणि व्यवस्थितानि। पाणिरादाने, पादौ विहरणे, पायुरुत्सर्गे, उपस्थ आनन्दे, बुद्धिरध्यवसाये, अहङ्कारो(ऽभि)मा(ने) मनः संकल्पे। यस्मात् स्वं स्वं विषयं गृह्णन्ति न परविषयम्। तस्मात् (परस्) परवि(ल)लक्षणा(ः)। किञ्चान्यत् — गुणविशेषा{।} गुणेभ्य उत्पन्ना इत्यर्थः। (कृत्स्नं) पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति। कृत्स्नं त्रिषु लोकेषु। योऽयं न परविषयः (तेषामिन्द्रियाणां) तं (प्रकाश्य) इन्द्रियाणि बुद्धौ प्रयच्छन्ति। बुद्धिस्थं विषयं सुखदुःखलक्षणं पुरुष उपलभते॥ ३६॥

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।

सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्॥ ३७॥

सर्वं त्रिष्वपि लोकेषु योऽयं विषयस् तं सर्वं प्रत्युपभोगं यस्मात्। उपभुक्त इत्युपभोगः, देवलोके मनुष्यलोके तिर्यग्योनौ च, तं प्रत्युपभोगम्। कर्मेन्द्रियाणि बुद्धीन्द्रियाणि च प्रकाश्य गृहीत्वेत्यर्थः, बुद्धौ प्रयच्छन्ति। बुद्धि(ः) पुनः पुरुषाय प्रयच्छति। अत्र दृष्टान्तो मन्त्रिराजवत्, तद्यथा मन्त्री {।} पुरुषेभ्यो वार्त्तामुपलभ्य राज्ञे कथयति तद्वदेव। यस्मात्

सर्वं प्रत्युपभोगमिति ज्ञानं चोत्पद्यत इति। किञ्चान्यत् सैव च विशिनष्टि पुनः
प्रधानपुरुषान्तरं सूक्ष्मम्प्रधानपुरुषान्तरं नानात्वमित्यर्थः। सूक्ष्ममित्यनुपलभ्य(मि)
दुर्दर्शमित्यर्थः। प्रकृतिपुरुषयोरन्तरमनीश्वरमित्यर्थः। {()}। तयोरन्तरं बुद्धिर्
विशेषयति, कथम्, अन्यत्वेनेति। अन्यः पुरुषोऽन्यत्प्रधानम्। सत्त्वरजस्तमांसि
त्रयो गुणाः प्रा(धा)निकाः। बुद्धिरन्याऽहङ्कारोऽन्यः, (पञ्च)तन्मात्राण्यन्यानि,
एकादशेन्द्रियाणि (अन्यानि), पञ्चमहाभूतान्यन्यानि, शरीरमन्यदित्येवं पुरुषं
बुद्धिर्बोधयति। तथा मोक्षं गच्छति। उक्तं च —

पञ्चविंशतितत्त्वज्ञो यत्र तत्राऽऽश्रमे रतः।
जटी मुण्डी शिखी दण्डी मुच्यते नाऽत्र संशयः॥5

तस्माद्बुद्धिरेवेह पुरुषमभ्युदयफले तु योजयति मोक्षं करोति॥३७॥

अत्राह यदुक्तं त्वया पूर्वस्यामार्यायां "पञ्च विशेषाविशेषविषयाणीन्द्रियाणि",
तत्र न ज्ञायते के विशेषा(ः) केऽविशेषा इत्यत्रोच्यते ---

तन्मात्राण्यविशेषास्तेभ्यो भूतानि (पञ्च) पञ्चभ्यः।
एते स्मृता विशेषा(ः) शान्ता घोराश्च मूढाश्च॥३८॥

त(न्मा)त्राण्यविशेषा यानि तानि तन्मात्राणि {()} अहङ्कारादुत्पन्नानि।
शब्दतन्मात्रं (स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं) गन्धतन्मात्रम्। एते पञ्चा

विशेषा(ः)। देवानां विषयः सुखलक्षणः। नापि तेषां दुःखमस्ति नापि मोहो(ऽ)स्ति
तस्मादविशेषाः। न विशिष्यन्ते {( )} शान्तघोरमूढत्वेन, तस्माद्
अविशेषा इत्युच्यते। तेभ्यो भूतानि (पञ्च) पञ्चभ्यः शब्दतन्मात्रादाकाशं,
स्पर्शतन्मात्राद्वायुः, रूपतन्मात्र(ा)त्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात्
पृथिवी, तानि पञ्चमहाभूतानि विशेषा इत्युच्यन्ते -------
--------------- कस्माद्यस्मात् शान्ता घोराश्च मूढाः (च)। तत्र
शान्तास्तावत् सुखलक्षणाः। प्रसादलाघवाभिष्वङ्गात्। हर्षप्रीत(ि)प्रसादा
(एव) सुखम्। यथा कश्चिद्देवदत्तो गृहे गृहे स्त्रीभिः सह क्रीडमानः
प्रस्विन्नः प्रासादमारूढ आकाशं प्राप्य सुखितोऽहं (इति) ब्रवीति। एवं
तदाऽऽकाशं शान्तम्। तदेवाकाशं वायुना शीतेन संयुक्तं दुःखं जनयति
ततो घोर इत्युच्यते। तदेवाकाशं मोहं जनयति, यथा कश्चिद्देवदत्तः
पन्थानं गच्छन् ग्रामान्तरं पश्यति ततो मूढो भवति। एवमाकाशं कदाचित्
सुखं जनयति, (कदाचिद् दुःखं जनयति) कदाचिन्मोहं जनयति॥ स
एव देवदत्तो गर्भगृहे स्थितः प्रासादाश्रमारूढो वातायनप्रविष्टेन
वायुना स्पृष्टः सुखितोऽस्मीति ब्रवीति, तेनैव वायुना प्रभूतेनोष्णमि(श्रेण)
स्पृष्टो दुःखितोऽहमिति। स एव वायुर्वातुलेन सञ्जातो मोहं जनयति

मूढाश्च भवति दिशां पूर्वायां वा किमुत्तरायां वेति। एवं वायुः सुखदुःखमोहान् जनयति। तथा तेजः शीतेनाभिभूतस्य देवदत्तस्य सुखं जनयति, घर्मेण सन्तप्तस्य दुःखम्। ग्रामनगरं दग्ध्वा मोहं जनयति। ता आपः<ऽ>शीतकाले दुःखं [जनयन्ति]। अप्सु म्रियमाणस्य मोहम्। यथा पृथिवी नवशाद्वला प्रावृट्काले सुखा। सैव दुःखं जनयति। स एव पन्थानं गच्छन् पृथिवीमेव पश्यन् न ग्रामनगरे मूढो भवति। एवं पृथिवी सुखदुःखमोहान् जनयति ॥३८॥

अथ के संसरन्ति। अत्रोच्यते —

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४०॥

पूर्वोत्पन्नमिति यदा लोका नोत्पद्यन्ते तदा प्रधानोत्पन्नं सूक्ष्मशरीरम् तस्मादुच्यते पूर्वोत्पन्नमिति। किञ्चान्यत् — असक्तं तत् सूक्ष्मशरीरं तैर्यग्योनिमानुषदेवस्थानानि गच्छति, पर्वतादिषु न प्रतिहन्यते भित्तीला निर्गच्छतीत्यर्थः। [नियतमिति] अज्ञानोत्पत्तौ संसारे व्यवस्थितमित्यर्थ तच्च महदादि। महानित्युच्यते बुद्धिः, महान् यस्यादौ तदिदं महदादि; बुद्धिरहङ्कारः पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चैतानि महदादीनि। [?] महदादि त्रयोदशविधेन करणेन संयुक्तमित्यर्थः। किञ्चान्यत् — सूक्ष्म[ ]पर्यन्तम्। यस्याऽन्ते सूक्ष्मशरीरस्य <सूक्ष्माणि> तद्भवति। <किञ्चान्यत् — संसरति> करणसंयुक्तं मातापितृजे शरीरे पतिते संसरति त्रीन् लोकान्। किञ्चान्यत् — निरुपभोगम्। तत्सूक्ष्मशरीरं त्रयोदशविधे[ ]करणेन संयुक्तं बाह्येनोपचयेन मातापितृजेन[ ]विना विषयग्रहणसमर्थं न भवतीत्यर्थ किञ्चान्यत् — भावैरधिवासितं लिङ्गम्। भावान् पुरस्ताद्वक्ष्यामः।

तैरधिवासितं संसरति। लिङ्गमिति प्रलयकाले सूक्ष्मशरीरं करणसंयुक्तं लयं गच्छतीति लिङ्गम् ॥४०॥

अत्राह — सूक्ष्मशरीरे नास्ति प्रयोजनं, त्रयोदशविधं करणमेव संसरतीति। तत्र यदुच्यते सूक्ष्मशरीरं संसरतीति तन् मिथ्या।

अत्रोच्यते —

चित्रं यथाश्रयमृते (?) स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विना(?) विशेषैर्न तिष्ठति निराश्रयं (?) लिङ्गम् ॥४१॥

सम्बं —

(वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्।
ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ॥४५॥)

नं लीनमात्मानिमिोति। ऐश्वर्यक्षये त्रिषु लोकेषु शरीरोत्पत्तिर्भवति। तस्
उच्यते — वैराग्यात् प्रकृतिलय इति। तत्र वैराग्यं निमित्तं, प्रकृतिल
नैमित्तिकः। किञ्चान्यत् — संसारो भवति राजसा(द्रागात्)। यज्ञं करोति
दानं ददाति, अमुष्मिंल्लोके सुखं भविष्यतीति। तेन् रागेण संसारो भवति
ब्रह्मादिषु स्थावरान्तेषु तैर्यग्योन्यन्तेषु ⟨च⟩। (तत्र रागो) निमित्तं संसा
नैमित्तिकः। किञ्चान्यत् — ऐश्वर्यादविघातः। एतदैश्वर्यम् अणिमा
लघिमा (महिमा) प्राप्तिः प्राकाम्यमीशित्वं (वशित्वं) यत्रकामावसायित
इत्यर्थः। ऐश्वर्येणाष्टगुणेन ब्रह्मादिस्थानेषु विहरति, न प्रतिहन्यते
ऐश्वर्यप्राप्तिः {(?)} निमित्तम् अविघातो नैमित्तिकः। किञ्चान्यत् —
विपर्ययात्तद्विपर्यासः। ऐश्वर्यव्याख्यानमष्टविधं, तद्विपरीतमनैश्वर्य
तेना(?)नैश्वर्येण यत्र क्वचित् परिगृह्यादिषु व्याघातो भवति विहन्यत
इत्यर्थः। तत्रा(नै)श्वर्यं (?) (निमित्तं) विघातो नैमित्तिकः। अष्टविधं निमित्त

अष्टविधं नैमित्तिकमेवमेष षोडशविधो निमित्तनैमित्तिकः सर्गो व्याख्यातः

॥४५॥

अत्राह — य एष निमि(त्तनैमि)त्तिकः समाख्यातः सर्गः स किमात्मक{ः} इति। अत्रोच्यते —

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्दैन तस्य भेदास्तु पञ्चाश(त्) ॥४६॥

एष इति तदुद्दिष्टः। आर्याद्वयेन षोडशविधो निमित्तनैमित्तिकः समाख्यातः सर्ग इति। अत्रोच्यते प्रत्यय(ाद्) बुद्धेरुत्पन्नस् तस्मात् प्रत्ययसर्गः {ः}। किञ्चान्यत् स च प्रत्ययसर्गो भूयश्चतुर्भिर्भिद्यते। यस्माद्ब्रवीति विपर्ययाशक्तितुष्टिसिद्ध्याख्यः। उक्तं च कश्चित् किलोपाध्यायोऽनुदिते सूर्ये चतुर्भिर्बटुभिः सह नगरमभिप्रस्थितः। {+}। कश्चिद्बटुः (वक्ति) — उपाध्याय! एषोऽत्र पथि दृश्यते, किं स्थाणुः स्याच् चोरो वा स्यादिति। तस्य बटोः स्थाणोः संशयः। तत उपाध्यायो (द्वितीयं बटुं ब्रवीति ज्ञायतां कोऽयमिति। तेन बटुना) उक्तं नाहं शक्नोम्युपगन्तुमिति। स एव(स्य) स्याद्(अ)शक्तिरुत्पन्ना। उपाध्यायो (भूयस्) तृतीयं बटुं (ब्रवीति) ज्ञायतां कोऽयमिति। स तृतीयो बटुर्निरीक्ष्य,

उपाध्यायं ब्रवीति — किमनेन, उत्थिते सूर्ये सार्थेन सह यास्याम इत्युक्त्वाऽऽज्ञत्व एष तुष्टः प्रसुप्तः। एवं तृतीयस्य बटोस् तुष्टिरुत्पन्ना। उपाध्यायो भूयश्चतुर्थं बटुं ब्रवीति ज्ञायतां कोऽयमिति। स निरीक्ष्य{ः} तस्मिन् स्थाणौ वल्लिं पश्यति स्थाणुमारूढं{ं} शकुनम् <च>। ततो गत्वा पादेन स्थाणुं स्पृष्ट्वा पुनरागत्योपाध्यायं ब्रवीति स्थाणुरयमिति। एवमेष प्रत्ययसर्गश्चतुर्धा विभज्यते भिद्यते च। विपर्ययाशक्तितुष्टिसिद्ध्याख्य इति व्याख्यातः। किञ्चान्यत्- तस्य चतुर्विधस्य वर्गस्य गुणवैषम्यविमर्दैन तस्य भेदास्तु पञ्चाशत्। गुणाः सत्त्वरजस्तमांसि परस्परं (वैषम्यात्) भव(न्)तीति। सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभवति। यथाऽऽदित्यप्रकाशो ग्रहनक्षत्रताराप्रकाशमभिभवति। तद्वदेव रज उत्कटं भवति सत्त्वतमसी अभिभवति। नोत्कटं भवति सत्त्व

(आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।

बाह्या (विषयोपरमात् पञ्च नव च तुष्ट्योऽभिहिताः॥ ५०॥)

हरन्ति। रक्षणे प्रवर्त्तमानानामात्मपीडाश्च भवन्ति, एवं रक्षणदोषा ताध्वा ----

----

(उ)च्यते तृतीयं प्रव्रजितं पृच्छति केन प्रव्राजितोऽसीति। स एवमाह शक्यं

विषया

षु महादुःखमुत्पद्यते। अतः क्षयदोषान् दृष्ट्वा प्रव्रजितोऽस्मि।

तस्याऽपि नास्ति मोक्षः। (पृच्छे)ति

किं त्वया ज्ञात्वा प्रव्रजितः स एवमेवोक्तवान् ------------

इह संज्ञा भवन्ति। तद्यथा – अम्भा(ः] ------------

(सुनेत्रं, सुमारीचकम्, उत्तमाम्भसि)कमिति तासां नवानां तुष्टीनाम् एताः

संज्ञाः। किञ्चान्यत् — एतासां नवानां तुष्टीनां या विपरीता(ः) ---------

(अनम्भः) --------- (असु)नेत्रम्, अमारीचकम्,

अनुत्तमाम्भसिकमिति। एवं च (नव) अशक्तयो व्याख्याताः॥

(ऊहः शब्दोऽध्ययनं दुःखविघातत्रयं सुहृत्प्राप्तिः।

दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः॥ ५१॥

कश्चित् परिव्रा(जकः) ---------------

(तन्मा)त्राणि। अन्यान्येकादशेन्द्रियाणि, अन्यानि पृथिव्यादीनि भूतानि ....

{ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥५४॥}

- - - - - - - - - - - - - - -

ता मनुष्याः]। तस्मादुच्यते ब्रह्मादिस्तंबपर्यन्तः। त्रिविधो लोकः, त्रिविधैर् गुणैर्व्याप्त इति। भूतसर्गो व्याख्यातः। भौतिके च कार्यं व्याख्यातम्। एवं भूतसर्गो भावसर्गो (लिङ्गसर्गश्चेति) त्रयः सर्गाः प्रधानीकृता व्याख्याताः॥ प्रधानकार्यं समाप्तम्॥ ॥

उत्पन्ना(स्) त्रयो लोकाः {।} प्रधानं चोपरतम् (उत्पाद्य लोकान् इति)। अत्राह — तेषु लोकेषु देवमनुष्यतिर्यग्योनिषु कः सुखं दुःखं (वा ऽनु)भवति। (किं प्रधानम् आहोस्विद्बुद्धिरहङ्कारस् तन्मात्राणीन्द्रियाणि महाभूतानि {।} (उतस्वित्) पुरुषो (वा) इति। अत्रोच्यते —

तत्र जरामरण(कृतं) दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्या ऽविनिवृत्ते(स्) तस्मा(द्) दुःखं स्वभावेन ॥५५॥

तत्र त्रिषु लोकेषु देवमानुषतैर्यग्योनिगतेषु। अत्र जरादुःखं मरणदुःखं च प्राप्नोति, अनुभवतीत्यर्थः। {।} कश् चेतनः पुरुषस्तत्र जरादुःखं वलीपलितखालत्याभिभूतो दण्डाविष्टम्भगात्रः

पुत्रपौत्रस्नुषापरिभूतो यद्दुःखमनुभवति तज्जरादुःखम्। मरणदुःखं व्याख्यास्यामः। अष्टगुणमैश्वर्यं भवति। अणिमादि, तच्च प्रागभिहितम् (दश) विषयाः सन्ति। मनुष्याणां सुखदुःखमोहात्मकाः, पञ्च देवानां विषयाः सुखलक्षणाः प्राग् व्याख्याताः। तेषु विषयेषु दृश्यस्व अष्टविधे चैश्वर्ये ततो देवदत्तो(न्तो) काले यमोहमुपयाति मरणात्। तस्यैव तस्यामवस्थायां यद्दुःखमुत्पद्यते तन्मरणदुःखं व्याख्यायते। एवमेते सुखदुःखे ऽन्तकाले ये च यानि च सु ....

[नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥६०॥]

...भावेन तिर्यग्योनिभावेन । एवमेभिरुपायैरात्मानं प्रकाश्याऽहमन्या त्वमन्य इति विनिवर्त्तते । किञ्चान्यत् — गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति । सत्त्वरजस्तमांसि त्रयो गुणास् तैर्गुणैर् गुणवती प्रकृति(:) सगुणा । {()} तस्या(ं) गुणा(:) सन्तीति सर्वगुणा(:) सत्त्वरजस्तमांसि त्रयो गुणाः । तस्मिन् पुरुषे न सन्ति । तस्मादगुणः सः । अगुणस्य सतस् तस्यार्थमपार्थकं चरति । यथा कश्चिद्देवदत्तो मित्रार्थं करोति । नैव तस्मात् किंचिदर्थं निर्वर्त्तयति । एवं प्रकृति(:) पुरुषार्थं करोति । पुरुषस्य च राग(म्) इत्यर्थः, चरति करोतीत्यर्थः, अनेकार्था धातव इति वैयाकरणा ब्रुवं ते । तस्माद्दृष्टा(ा) प्रकृतिः पुरुषेण निवर्त्तते ॥६०॥

तस्मादाह — —

(प्रकृतेः) सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टास्मीति पुनर्न दर्शनम् {()} उपैति पुरुषस्य ॥६१॥

यथेयं प्रकृति(:) प्रधानमित्य(नो)र्थान्तरम् । लोके यथा प्रकृते(:)

सुकुमारतरं नास्त्यन्यत्र । किं च सुकुमारतरं भवति । कोऽर्थ इति । स्त्रीं पश्यति सर्वगुणोपपन्नाम् । ततोऽन्यां पश्यति विशिष्टतरां द्वितीयां तृतीयां ⟨च⟩ पश्यति । ततो ब्रवीति — इयं सुकुमारी, इ(यं) सुकुमारतरेति । पुरुषस्य परमात्मनो बुद्धिरुत्पन्ना । प्रकृते(:) सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति । ममेति {()} पुरुष आत्मानं ब्रवीति । एवं सुदृष्टा कृता भवति प्रकृतिः पुरुषेण । तत्र सुकुमारं वर्णयन्ति । ईश्वर(:) का(ा)रणमिति केचिदाचार्या ब्रुवते । उक्तं हि —

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥

केचिदाचार्या ब्रुवते — स्वभाव(:) कारणम् । यस्मादाह पुरुष एवेदं जगतः (कारणं) तस्मात् पुरुष(:) कारणमित्येवं वेदविदो विप्रतिपन्न । तत्राचार्यो ब्रवीति साङ्ख्यानां प्रधानं कारणं, कस्मात् सगुणत्वात् । इमाः प्रजाः सगुणाः । सत्त्वरजस्तमांसि त्रयो गुणास् ते च प्रजासु सन्ति । अतः सगुणान् प्रजा(न्) दृष्ट्वा साधयामः । प्रकृतेरिमाः प्रजाः समुत्पन्ना इति गम्यते । इह लोके यादृग्लक्षणं ⟨कारणं भवति तादृग्लक्षणं⟩ कार्यं भवति । यथा शुक्लेभ्यस् तन्तुभ्यः पटः शुक्लो भवति । कृष्णेभ्यस्

तन्तुभ्यः कृष्णो भवति। एवं तु गुणेभ्यः प्रधानात् त्रिगुणाः (प्रजाः) उत्पद्यन्ते।

इह गम्यते — निर्गुण ईश्वरः, निर्गुणादीश्वरात् सगुणानां लोकानाम् उत्पत्तिरयुक्ता, तस्मादकारणमीश्वरः। अनेनैव पुरुषो व्याख्यातः। पुरुषोऽपि निर्गुणः। निर्गुणात् पुरुषात् सगुणानां लोकानामुत्पत्तिरयुक्ता। तस्मात् पुरुषोऽप्यकारणम्। किञ्चान्यत् स्वभावो नाम कश्चित् पदार्थोऽस्ति, यतः प्रजानामुत्पत्तिः स्यात्। अत्र ये ब्रुवते स्वभावः कारणमिति ते मिथ्या ब्रुवते।

अपरे पुनराचार्या मन्यन्ते कालः कारणं लोकानामिति। यस्मादाह—

कालः पचति भूतानि कालः संक्षिपते जगत्।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः॥

तस्मात् कालो लोकानुत्पादयति। ⟨एवं⟩ अपरे ब्रुवते कालः कारणमिति। अतः साङ्ख्यप्रपन्नः कालो नाम ⟨न⟩ कश्चित् पदार्थोऽस्ति। व्यक्तमव्यक्तं पुरुष इति पदार्थाः साङ्ख्यादीनां तेषु कालोऽन्तर्भूतः। नान्यदित्यर्थ एवमेतेभ्यः। प्रधानमेव कारणम्, एवमेव ज्ञानमुत्पद्यते पुरुषस्य। तत् {।} सम्यग् ज्ञानमुत्पन्नं भवति। यदाऽनेन सुदृष्टा प्रकृतिर्भवति पुरुषेण तदा निवर्तते प्रकृतिः। तस्यां निवृत्तायां पुरुषो मोक्षं गच्छति। एवमीश्वरादीनि (अ)कारणानि। {।} सुकुमारतरं

⟨प्रधानं⟩ तस्मादुच्यते — प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ईश्वरादीन्यकारण(णा)नि प्रधानमेव कारणमिति बुद्धिरुत्पद्यते। तदा सुदृष्टा {।} पुरुषेण प्रकृतिः भवति। यथा कुलस्त्री सहसागतेन पुरुषेण दृष्टा व्रीडोत्पन्ना (न) तस्य दर्शनं गच्छति। पुरुषेण ज्ञानचक्षुषा दृष्टा सती कुलस्त्रीवत् पुरुषस्य दर्शनं नेच्छति। तस्यां निवृत्तायां पुरुषो मोक्षं गच्छतीति॥६१॥

अत्र लोको ब्रवीति शिष्टाश्च ब्रुवते पुरुषो संसरतीति ⟨किम्⟩ एतद् युक्तम् {।} (अ)युक्तं (वा)। ⟨एतदयुक्तं⟩ कस्माद् यस्मादाह —

तस्मान्न बध्यते नापि (मुच्यते नापि) संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥६२॥

पुरुषो न बध्य(ते)। कस्मात् निर्गुणत्वात्, (सर्वगतत्वात्), अविकारत्वात्, निष्क्रियत्वाच्च। पुरुषः कर्त्ता न भवति। अथ कर्त्तुः कथं बन्धो भविष्यति। यस्मान्न बध्यते तस्मान्न मुच्यते। मुक्त एव सः। नैव संसरति। सर्वगतस्य संसारः कुतः। अप्राप्तप्रापणार्थं गमन(म्) इत्युच्यते। सर्वं प्राप्तं येन पुरु(षे)ण तस्य न विकृतिः। ⟨ये पुरुषतत्त्वं न विदन्ति ते⟩ ब्रुवते — पुरुषो बद्धः पुरुषो मुक्तः पुरुषः संसरति। अत्राह यदि पुरुषस्य

(न) बन्धोऽस्ति (न) मोक्षो नापि संसरणम्, किं हि बध्यते मुच्यते च।
नानाश्रया प्रकृतिः, कस्मात् - कर्तृत्वाद् अचैतन्याच्च। प्रकृतिरेवाऽऽत्मानं बध्नाति सैव चाऽऽत्मानं मोचयति। यत्तत् सूक्ष्मशरीरं तन्मात्रिकं त्रयोदशविधेन करणेन संयुक्तम् एवं त्रिविधेन बन्धेन बध्यते। कृतमस् त्रिविधो बन्ध इत्युच्यते दाक्षिणबन्धः प्रकृतिबन्धो वैकारिकबन्धः। एते(नि) त्रिविधेन बन्धेन (बद्धे) सूक्ष्मशरीरे उत्पन्ने त्रिविधा बन्धा इत्युच्यते। मुच्यते बध्यते संसरति नानाश्रया प्रकृतिः। नानाश्रयेति त्रयाणां लोकानाम् आश्रयभूता {(।)}। यत्तत् प्राधानिकं सूक्ष्मशरीरं तत् प्रधानं प्रकृतिरित्यनर्थान्तरम्। तत्र ये ब्रुवते पुरुषो बद्धः पुरुषो मुक्तः संसरति ते मिथ्या <ब्रुवते>॥ ६२॥

कैर्गुणैरात्मानं प्रकृतिर्बध्नाति कैश्च मोचयति। अत्रोच्यते -

रूपैः(:) सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं (प्रति) विमोचयत्येकरूपेण ॥६३॥

सप्तरूपैरात्मानं बध्नाति। अथ कानि रूपाणि। अत्रोच्यते - धर्मो ज्ञानं वैराग्यमैश्वर्यम् अधर्मोऽज्ञानमवैराग्यमनैश्वर्यमिति, एतानि सप्तरूपाणि। एतैः सप्तभी रूपैरात्मानं बध्नाति प्रकृतिः।

पुरुषार्थो मया कर्तव्य (इति)। विमोचयत्येकरूपेणाऽऽत्मानम्। किं त्व् एकरूपं ज्ञानमिति। ज्ञानेनात्मानं मोचयति॥ ६३॥

किं वा स्यात्।

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्(द्) विशुद्धं केवलमुत्पद्यते ज्ञानम्॥ ६४॥

एवमिति यथा पूर्वोक्तानि पञ्चविंशति तत्त्वानि प्रधानं बुद्धिरहङ्कारः (पञ्चतन्मात्राणि) पञ्चमहाभूतानि (एकादशेन्द्रियाणि) पुरुष(श्च) इति। शरीरमात्रोऽनुभवामीति अथ मा ह खलु कोऽत्राहमिति ज्ञानमुत्पद्यते, किञ्चान्यत् - ममेदं शरीरमन्यदतो(ऽहमन्यो) भवामि। प्राधानिकमिदं शरीरमित्यविशेषज्ञानमुत्पद्यते, (अ)परिशेषं (निरवशेषम्) इत्यर्थः। ज्ञानाच्च ज्ञानं (अ)विपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्। विपर्ययाः(:) संशयः। तस्मादविपर्ययाद् (अ)संशयादित्यर्थः। शुद्धं ज्ञानं केवलं, मोक्ष इत्यर्थ उत्पद्यते। तच्च ज्ञानं पुरुषस्येति ॥६४॥

अत्राह {(।)}—

तेन निवृत्तं प्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्)।
(प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥६५॥) इति।

निवृत्त(ः) प्रसवः यस्याः सेयं निवृत्तप्रसवा, तां निवृत्तप्रसवां प्रकृतिं पश्यति पुरुषः। तेन ज्ञानेन प्रेक्षकवदवस्थितः स्वस्थस्तासु तास्ववस्थासु नृत्यन्तीमिव नर्त्तकीं पश्यति। पुरुष आत्मज्ञानेन तासु तास्ववस्थासु वर्त्तमानां प्रकृतिं पश्यति। इयमेव प्रकृतिः सर्वपुरुषान् (ब)ध्नाति {८} स्वैरेभिर्धर्मादिभिः। किं ज्ञानचक्षुषा पश्यति ?। दृष्ट्वा ‹च› ज्ञानचक्षुषा प्रकृतिः किं करोतीति। अत्रोच्यते — उपरमते, नर्त्तकीवद्दृष्टाऽहमनेन रङ्गेनेति ॥६५॥

दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमते तेषाम् ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥६६॥

यथा लोके (नर्तकी) सर्वास्ववस्थासु वर्त्तमाना दृष्टोपरमति रङ्गात्, एवं दृष्टा मयेत्युपेक्षक एष पुरुषः। इयं प्रकृतिः मया दृष्टा सम्यगिति। उपरमते मोक्षं गच्छतीत्यर्थः। प्रकृतिरप्येका सर्वथा दृष्टाऽहमिति पुरुषाद्धि उपरमते।

अत्राह — पुरुषोऽपि सर्वगतः प्रकृतिरपि सर्वगतः, अनयोः सर्वगतयोः संयोगः (इति) ब्रुवते, तस्मात् संयोगात्म(कत्वं) भूत्वा पुनःशरीरोत्पत्तिर् इति। अत्रोच्यते — सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।

उत्पत्तिः सर्गः, उत्पत्तेः पुनः प्रयोजनं नास्ति। कस्मात्?। प्रधान(स्य) पुरुषार्थप्रवृत्तिः, स चार्थो द्विविधः — शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तः (च)। प्रवृत्त्या च पुरुष(ार्थं) शब्दादिषु त्रिषु लोकेषु यज्ज्ञानमुत्पद्यते, मोक्षं ‹च› कृतम्। भूयः किं प्रयोजनं शरीरोत्पत्त्या करिष्यतीति। पुरुषार्थं — मया प्रकृतिर्दृष्टा सम्यगुक्त ‹इति› पुरुषस्य दर्शनार्थं प्रकृतेः‹प्रवृत्तिर्› इत्युक्तम्। पुरुषेण च प्रकृतिर्दृष्टा। कृतप्रयोजनः पुरुषः तयोः कृतप्रयोजनयोर्यद्यपि संयोगः सर्वगतयोः, भूयः शरीरोत्पत्तेः प्रयोजनं नास्ति। यथा लोक ऋणधारणवद् दृष्टान्तः उत्तमर्णोऽधमर्णश्च। यः पूर्वं दत्त्वा पश्चाद् गृह्णाति स उत्तमर्णः। यः पूर्वं गृहीत्वा पश्चात् प्रयच्छति सोऽधमर्णः। ऋणिना दाता संयुज्यते "ऋणं मे देहि" इति। अहन्यहनि ततस्तेनाधमर्णेन चिरकालेन तदृणं दत्तम्। ततस्ताभ्यां कृतप्रयोजनाभ्याम् इतरोऽप्यर्थे न संयुक्तः, अपरोऽप्यृणि मुक्तः, (अथ) एवं तयोर्दृष्टः संयोगो भवति। असंयोगस्थाः प्रयोजनं करोति ? एवं भूयो भवति प्रधानपुरुषयोः सर्वगतयोः संयोगः, यो (न) शरीरोत्पत्तिं करोति ॥६६॥

अत्राह — ज्ञानोत्पत्तेर् मोक्षो भवति। तवापि ज्ञानमुत्पन्नम्।

त्वं किमर्थं मोक्षं न गच्छसीति। त्वत्प्रसादान्ममाऽपि (ज्ञानमुत्पन्नम्),
किमर्थं नाहमपि मोक्षं गच्छामि। तत्र यदुक्तं ज्ञानान्मोक्ष तन्मिथ्या{()}
(इति) शिष्यवचनमिति।

अत्रोच्यते —

सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः॥६७॥

यद्यपि पञ्चविंशतितत्त्वज्ञानमुत्पन्नं, धर्मादीनाम् अकारणप्राप्तिः। ज्ञानस्य (अभावे) धर्मो वैराग्यमैश्वर्यम् अधर्मो (ज्ञानम्) अवैराग्यमनैश्वर्यम् इति एतानि सप्त बन्ध(नो)नि। तानि च ज्ञानदग्धानि। (यथा) (दग्ध) बीजानि {()} न प्ररोहणसमर्थानि भवन्ति, एवं ज्ञानदग्धानि (ज) {()} समर्थानि भवन्ति। तत उत्पन्ने ज्ञाने धर्मादीनाम् अकारणत्वं प्राप्नोति। तिष्ठति पुरुषः संस्कारवशादन्यस्यां जातौ। कृतौ धर्माधर्मौ। तन्निमित्तं कृत्वा शरीरोत्पत्तिर्भवति देहिनां तिर्यग्योनौ वा (मनुष्यलोके वा) देवलोके वा। पूर्वतो धर्मोऽधर्मो वा यन्निमित्तं शरीरं, तस्य संस्कार इति ग्रहणम्। संस्कारो न तावत् क्रियया गच्छति फल(मदत्त्वा) उत्पन्नोज्ञानस्यापि विनाशं गच्छति शरीरम्। यदा फलमदत्तं भविष्यति सुखं वा यदि दुःखम्,

धर्माधर्मौ पूर्वकृतौ विनाशं यास्यतः{()}। ततो निमित्ताभाव इदं शरीरं न भविष्यति। तस्मिन् पतिते, विद्वान् मोक्षं यास्यति। अस्माद्धेतोर् उत्पन्नज्ञानस्याऽपि धर्माधर्मवशात्तिष्ठति शरीरम्। को दृष्टान्तः? चक्रभ्रमवद्धृतशरीरः। यथा कुलालश्चक्रं भ्रामयति "घटं करिष्यामि" इति स कुलालो घटं कृत्वा विक्षिप्य गृहं गतः, ततस्तस्मिन् गृहगतेऽपि कुलाले चक्रं भ्रमत्येव। संस्कारवशाद्वेगवशादित्यर्थः। एवमेव पूर्वकृतयोर्धर्माधर्मयोः संस्कारवशाच्चक्रभ्रमवत् (विद्वांस्तिष्ठ)ति॥६७॥

अत्राह — उत्पन्नज्ञाने विद्वान् कदा मोक्षं गच्छतीति। अत्रोच्यते —

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥६८॥

शरीरस्य भेदे शरीरभेदे प्राप्ते। चरितार्थत्वाच्चरितार्थत्वं तस्माच् च(रि)तार्थत्वात्। प्रधाननिवृत्तौ यदा पूर्वकृतयोर्धर्माधर्मयोः क्षयो भवति, तदा तच्छरीरं भिद्यते। यथा छत्राभावे छायाभावः। इह शरीरे यत् पार्थिवं तत्पृथिवीं गच्छति। यद् आकाशमयं तद् आकाशं गच्छति। यद् आप्यं तद् अपः प्रविशति। यत्तैजसं तत् तेजः प्रविशति। यद्वायव्यं तद्वायुं प्रविशति। एवमिदं शरीरं पञ्चधा भिन्नम्। प्रधानं कृतप्रयोजन

द्वितीयं शरीरं नोत्पादयति विद्वषे। एवमयं विद्वांस्तस्मिन् शरीरे भिन्न {(१)} एकान्तेनैव मोक्षं गच्छति न आत्यन्तिकं गत्वा पुनरावर्त्तते। तस्माद् उच्यते — ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

अत्राह — किंप्रयोजनं ज्ञानमिति। अत्रोच्यते —

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥६९॥

अत्राह — कश्च स पुरुषार्थ इति। अत्रोच्यते — मोक्षः पुरुषार्थः। मोक्षार्थमिदं ज्ञानमुत्पन्नम्। अब्रह्मणे यद्(ा) न देयमित्यर्थः। इदं च ज्ञानं परमर्षिणा भगवता कपिलेन(ा)(समाख्यातम्)।

अत्राह — अस्मिन् ज्ञाने किं चिन्त्यत इति। अत्रोच्यते — स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्। स्थितिश्च प्रलयश्चोत्पत्तिश्च ते भवन्ति, स्थित्युत्पत्तिप्रलयास् ते यत्र चिन्त्यन्ते{(१)} ब्रह्मा[दी]न्यष्टौ स्थानानि. पञ्चविधं तिर्यङ् मानुषम् ⟨च⟩ एकविधम्। [एषु स्थानेषु ब्रह्मादीनि] तिर्यग्योनान्तानि भूतानि तिष्ठन्ति। एषा स्थितिः। उत्पत्तिं व्याख्यास्यामः। प्रधान(ाद्) बुद्धिरुत्पद्यते, बुद्धेरहङ्कारः, अहङ्कारात् पञ्च तन्मात्राण्येकादशेन्द्रियाणि। {(१)} [पञ्चतन्मात्रेभ्यः] पञ्चमहाभूतानि ⟨च⟩, एषोत्पत्तिः। प्रलयं

वक्ष्यामि। महाप्रलये पृथिव्यादीनि तन्मात्रेषु लयं गच्छन्ति। तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिः प्रधाने, एष {(१)} प्रलयः। तस्मादुक्तं स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानामिति ॥६९॥

अत्राह — यदेतद् व्याख्यातं तेनोक्तं परमर्षिणा परमज्ञानं पञ्चविंशतितत्त्वज्ञानम् {(१)}। पञ्चविंशतितत्त्वज्ञानस्य कुत आगम इति। अत्रोच्यते —

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ॥७०॥

एतज्ज्ञानं यद्व्याख्यातम्। तत् पवित्रं करोति — तिर्यग्योनिवर्त्तमान(लो)द्ब्राह्मणान् पुनाति। सर्वेषां वेदानां ज्ञानानामग्र उक्त(म्)इत्य् ⟨अग्र्यम्⟩। स महामुनिः भगवान् कपिलः तज्ज्ञानम् आ(ा)सुरिसगोत्राय वर्षसहस्र(य)याजिने प्रददौ "नापि धर्मार्थम्"। अन्तमस्य् अज्ञानेऽयं वर्त्तमान इत्य् अनुकम्पया प्रददौ तस्मिन् तज्ज्ञानः तदेव ज्ञानं भूय आ(ा)सुरिसगोत्र(ः) अनुकम्पया पञ्चशिखाय प्रददौ ⟨यः⟩ पञ्चशिखो नाम ब्राह्मणस् तस्मै। तस्माद्ब्रवीति — आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ॥७०॥

<---->संक्षिप्तं ज्ञानं<---->। क्षेत्र(ज्ञो) इत्युच्यते पुरुषः। एवं संक्षिप्तमिदं
1---------1 2

ज्ञानमिदमार्यमतिना दत्तम् आसुरये। तेनापि तदेव ज्ञानं संक्षिप्तं
3

पञ्चशिखाय दत्तम्। एवं पवित्रं कोसलको ब्राह्मणः ईश्वरकृष्णो नाम
4

शिष्यहितार्थं षष्टितन्त्रं संक्षिप्तवान्। यस्मादाह --
5 6

शिष्यपरम्परयागत(म्) ईश्वरकृष्णेन चैतदार्याभिः।

संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥७१॥

अत्र शिष्यपरम्परयागतम् इति। अत्र कपिलादासुरिं प्राप्तं (इदं ज्ञानम्)
6' 7

आसुरेरपि पञ्चशिखं, पञ्चशिखाद् गार्ग्यं, उलूकवंवलिप्रभृतीनां शतं,
8

तेभ्यश्चेश्वरकृष्णेन। एतज्ज्ञानमार्याभिः। आर्याणां सप्ततिः प्रमाणं

दुःखत्रयाभिघातादित्येवमादि। एतत् पवित्रमिति, एवं (तो)त् प्रमाणं
9

सप्ततिं कृत्वा। एभिरार्याभिः संक्षिप्तमार्यमतिनाद्, आर्या मतिर्यस्य
10

स भवत्यार्यमतिः। भावितमतिनेत्यर्थः सम्यग् विज्ञाय सिद्धान्तमिति ॥

साङ्ख्यवृत्तिः समाप्ता ॥ ॥छ॥ ग्रन्थोऽयं ग्रन्थमानेन श्लोका(ः) १३००

मङ्गलं महाश्रीः। संवत् ११७६ ॥

NOTES ON SĀṀKYAVṚTTI

A page number of text and that of note on this text are corresponding.

Several pages of "Notes on SV." as seen in the mimeograph edition are sometimes included within one page in this edition, but in such cases the page numbers of the mimeograph edition are reserved as they are, in order to indicate concordance between a text and a note.

1. Copied in pencil.
2. –°न्नि°–
3. तदकारुण्यादु°–
4. –°यि°– Emended as here. cf. MV. P.2, l.5. °वर्षसहस्रयाजिनम्° ; PC. 千年祠天
5. Completed as here.
6. स°– Emended as here.
7. त°– cf. MV. P.2, l.13. अथ स भगवता उक्तः –
8. –°हा सब्र°– Emended as here. (cf. MV. P.2. ll.14~15)
9. कुतस्य cf. MV. P.2, ll.20~21. तत्र यदि कश्चिदेवं ब्रूयात् — कुतोऽस्य जिज्ञासा समुत्पन्ना यया ऽसौ गुरुकुलमभिगत इति ।
10. इत्य्

1. completed as here.
2. कुतः कृत्य°– Emended as here.
   Cf. SV. P.3, l.4. किं कृत्वा कृतवान् स्यामिति
   SV. P.39, l.6 केचित् किल चोरा ग्रामं हत्वा कृतकार्याः –
   MV. P.2, l.23. – किं कृत्वा कृतार्थाः स्यामिति --
   MV. P.34, ll.6~8. केचित्किल चौरा ग्रामं हत्वा द्रव्यं गृहीत्वा ग्रामान्तरं गच्छन्ति कृतकार्याः ।
3. पित्त = ཁྲིས་པ་ cf. TJ. ...རླུང་དང་ཁྲིས་པ་དང་། བད་ཀན་ལ་སོགས་པའི་... (षष्ठः परिच्छे
   PC. on Kā. 1 ; GBh. P.2, l.5 ; MV. P.3, l.8 ; JM. P.1, ll.18~19 ; TK. P.2, ll.4~5.
   Yd. P.8, 6a, l.8. ; Chand. P.1, l.16 ; TK. P.30, l.26~P.31, l.1. (on Kā. 13).
4. ऊर्द्ध
5. –°ष्मणा वाऽ Emended as here.
6. वा अ°–
7. –°च्छि°–
8. –°रवा°·
9. Inserted as here.

1. °स्त्या° cf. PC.---風雨寒暑----; GBh.---°वातवर्षाशनि°---; YD.---°वातवर्षा शन्य°---

2. °ते

3. °दि°

4. completed as here.

5. इति cf. MV. p.3 ll.16~18. किममूनि दुःखानि वपुष आहोस्वित्तद्व्यतिरिक्तोऽस्ति कश्चिदन्यः पुरुषो यस्येमानि त्रीणि दुःखानि जायन्ते, उतामीषां प्रतीकारोपायोऽप्यस्ति न वा।

6. ?

7. °ख्या° G. cf. MV. p.3. l 19. यद्यस्ति तदानीं <u>तमेवास्थास्यामः</u>।

8. °स°

1. ~~कायशल्यः मलाकी विषोन्मा(?) क्लीब जराकुमार विविकिलितानि~~
cf. MV. p.4. ll.13~15 शारीराध्यात्मिकानां ज्वरातीसारादिसकलव्याधीनां सन्त्येवागदङ्कारा अष्टाङ्गायुर्वेदविदो भिषजः कायशल्यशलाकाविषोन्मादक्लीब-जराकुमारचिकित्सानिपुणाः।

2. °ष्टा°

3. °मे

4. completed as here.

5. °णो

6. °न्त्या°

7. °धौ Emended as here.

8. °वें Emended as here.

9. हेतवो द्° Emended as here.

10. °यो°

11. स्तन्यातो / 11' completed as here.

12. °वाः

13. नुन मक्षणवद्दाति रमृतं मर्त्यस्य cf. GBh. p.2, last three lines & GBh. Sharma's notes p.2; MV. p.6, ll 14~15; JM. p.3, ll. 3~4.; TK.(p.4.l.2) & YD.(10.b)------ "अपाम सोममममृता अभूम"; PC. 我昔飲須摩味故成不死。得入光天識見諸天。是苦怨者於我復何所作。死者於我復何所能。
GBh. अपाम सोममममृता अभूमागन्म ज्योतिरविदाम देवान्।
किन्नूनमस्मान्(1) कृणवदरातिः(2) किमु धूर्तिरमृतमर्त्यस्य॥
(1) JM. किमस्मान् (2) MV. तृणवदरातिः

14. उपस्थितानां देवादिन्द्र

15. °म्यमुचुः

1. याम Emended as here.
2. स
3. -°त
4. किं
5. तस्यात्मनेति
6. -°था copied in pencil. Suggested as here.
7. -°र्गो
8. -°म्रो
9. -°दु
10. Copied in pencil (as भव(ति).
11. प्रस्यं
12. इये त्तो
13. -°त्
14. copied in pencil.
15. तस्मानुपो वन्तो व्याधयः
16. -°ती°-
17. -°दि°-
18. जय
19. -°ती-
20. न्प्र°-
21. वेदा वा
22. -°नी

1. तेषां
2. दृष्टं यत् cf. JM. P.3 (on Kā.2) दृष्टेन तुल्यो दृष्टवत्।
3. -°थ्या
4. -°वश्च
5. दवे cf. PC. 所見因者醫方中所說有不定不極過失。隨聞因者傳聞所得。初從梵王乃至仙人。故說四皮陀名隨聞。此皮陀昔亦兩過失。如是見醫方.....
6. Completed as here.
7. -°[द]°- Instead of वचनाद्व्यूनानि, वचनादुनानि is used in GBh. (P.3, ll. 18~19); MV. (P.7, ll. 21~22); YD. (11a) cf. PC. 如馬祠說言。盡殺六百獸少三不具足則不得生天。為戲等五事; GBh. Sharma's notes P.2. 六百獸
8. धर्म is suggested by G.
9. -°जन्म° is suggested by G.
10. Cf. PC. 若人說妄語諸天及仙人說此非是罪。
11. Completed as here.
12. -°निन्द
13. कालिन
14. Cf. PC. (on Kā.2) 二退失者。如皮陀中說。無故而帝釋及阿修羅王。為時節所滅。時不可免故。是法若滅盡。施主從天退。故有退失義。
GBh. P.3. ll. 20-23.
'यथा —
बहूनीन्द्रसहस्राणि देवानां च युगे युगे।
कालेन समतीतानि कालो हि दुरतिक्रमः॥
एवमिन्द्रादिनाशात् क्षययुक्तः।
JM. P.3, l.22. 'बहूनीन्द्रसहस्राणि व्यतीतानि युगे युगे'
Mahābhārata (XII, 220.41)
बहूनीन्द्रसहस्राणि दैतेयानां युगे युगे।
अभ्यतीतानि कालेन कालो हि दुरतिक्रमः॥
See V. M. Bedekar: The doctrines of Svabhāva and Kāla in the Mahābhārata and other old Sanskrit works. (The Journal of the University of Poona: Humanities Section, No. 13.)

1. completed as here.
2. -°सया ए°-
3. -°रे
4. -°नो Emended as here.
5. -° र्यो
6. -°मीति
7. -°ऽयं
8. -°तिए°-
9. completed as here.
10. व्यक्ताव्यक्तविज्ञानं
11. completed as here.
12. -°क्ता
13. मुंडी
14. Cf ① verses in TSP. (P.17, ll. 3~4) [& SV. (on kā. 22), P.43] which are same as this verse mentioned here.
[[Tib. version of TSP. gives 'gnas' (= 'vaset' G.) to the place of 'ratah']]
② GBh. P.2, ll. 1~2) & Tib. version of the Verse in TSP referred in ①.
[['vaset' instead of 'ratah' of TSP. (Skt. Text)]]
③ TMV. (on kā. 22. P.38. ll. 2~3.)
[['yatra tatra' instead of 'yatrayatra' of TSP. (Skt.)]]
④ JM. (P.1. ll. 7~8). & GBh. (on kā. 23, P.25, ll. 10~11.)
[['yatrakutra' instead of 'yatrayatra' of TSP. (Skt.)]]
⑤ SV. (on kā. 37.)
[['yatra tatra' instead of 'yatra yatra of TSP. (Skt.);
'daṇḍī' instead of 'vāpi' of TSP. (Skt.)]]
⑥ PC. 若知二十五隨處道住。編髮髻剃頭 得解脫無疑
(on kā. 2, & kā. 37)
[[The underlined is read in PC. on kā. 37 as 平等得解脫.]]
See Ui: "On Sāmkhya-Yoga" & Sharma's Introduction to GBh. P.15.

15. Completed as here.

1. -°ताद्या
2. सप्त°-
3. Cf. MV. P.9, l.18, प्रकरणात्प्रकृतिः । ; TK. P.7. ll. 10~11, प्रकरोतीति प्रकृतिः प्रधानम्
; YD. 18b, मूलप्रकृतिरविकृतिः — मूलमाधारः प्रतिष्ठेयमर्थान्तरं प्रकरोतीति प्रकृतिः । ;
PC. 本性能生於大等。是故得本名。(on kā. 3);
TJ. གང་གི་ཕྱིར་རྒྱུ་རབ་ཏུ་བསྐྱེད་པ་དེའི་ཕྱིར་ན་རང་བཞིན་ནོ༎ (षष्ठः परिच्छेदः। सांख्यतत्त्वावतारः).
4. Cf. GBh. P.4, ll. 12~13, प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात् । मूलं च सा प्रकृतिश्च मूलप्रकृतिः । ; MV. P.9, ll. 17~18, मूलं सप्तानां प्रकृतिविकृतीनामादिरित्यर्थः ।.
5. Cf. GBh. P.4, ll. 13~14, अविकृतिः अन्यस्मान्नोत्पद्यते तेन प्रकृतिः कस्यचिद्विकारो न भवति । ; MV. P.9. l.14, न विकृतिरविकृतिरन्यस्मादनुत्पत्तेः । कारणमेव सा न कार्यमित्यर्थः । अनुत्पन्नत्वादुत्पादकत्वाच्च ।.
6. -°न्तो
7. -°न्ना°-
8. -°र्थम्
9. अ°-
10. -°तीति

1. -°क
2. -°चः
3. -°द्वा°-
4. -°जा Cf. GBh. P.5, ll. 18f. & P.8, ll. 9f. (यथा-इन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गोऽप्सरस इत्यादि। The underlined is replaced by इति in GBh. P.8); SV. P.13, ll. 7f; (See NSBh. on Sū. 2-1-53 too).
5. -°मा
6. -°प्ति
7. -°प्ति
8. -°यं Emended as here.
9. Cf. MV. P.13, ll. 19f.; GBh. P.5, ll. 21f.; PC. (on kā. 4) (阿含是聖言。聖者滅諸惑。無惑不妄語。因緣不生故。)
10. -°भावः
11. दैतह्यां
12. -°न्नां

1. Cf. MV. P.11, ll. 15~16; GBh. P.6, ll. 11~12.
   दक्षिणेन तु(*) विन्ध्यस्य सह्यस्य तु(*) यदुत्तरम्।
   पृथिव्यामासमुद्रायां स प्रदेशो मनोरमः॥ (Reading in MV.)
   (*) In GBh. reading is च.
2. -°तिः आ°-
3. -°द्या अ°-
4. Cf. YD. (24a l.1) यत्तु खल्विति ह उवाच याज्ञवल्क्य इत्येतदैतिह्यं नाम प्रमाणान्तरमुपकल्पयते। SM. (P.6) 'इति ह वै वैश्रवणः' इत्यैतिह्यम्। एतदाप्तवचनमेव न प्रमाणान्तरम्। 'इति ह' इति निपातसमुदाय उपदेशपारम्पर्ये वर्तेते। इतिह एवैतिह्यम्।
5. वस्ता
6. -°ल°-
7. वे°-
8. चेति ह्यौपम्यं
9. वा°-
10. -°के°-
11. द्वि°- Emended as here.
12. आम्नाद द्रूणभा यक्षरो प्रतिभा छे अम्नाद द्रूणहामार्ष्टि यालिपि छे
    अन्ना दद्रूण मार्ष्टि पत्यौ भार्यापचारिणी।
    गुरौ याज्यो श्च शिष्यश्च स्तेनो राजन् किल्बिषम्॥

    Dr. R.C. Pandeya found it as quotation from मनुस्मृति.

1. प्रमेयः Emended as here by G.
2. द्धिं प्रमाणसिद्धिं
3. द्वि°-
4. -°ता

12 ((१२))

1. °न्य Emended as here.
2. पतनं is indicated for this place.
3. °मा°
4. °का°
5. °पति°
6. चरत
3~6. Cf. JM (P. 8, ll. 9~15.) Seven Sambandha's are enumerated in JM.—
① स्वस्वामिभावसम्बन्धः ② प्रकृतिविकारसम्बन्धः ③ कार्यकारणसम्बन्धः
④ पात्रपात्रिकसम्बन्धः, ⑤ साहचर्यसम्बन्धः, ⑥ प्रतिद्वन्द्विसम्बन्धः,
⑦ निमित्तनैमित्तिकसम्बन्धः.
7. वा
8. °मो°
9. °मं

13 ((१३))

1. °पि ह्रि is shown in space.
2. नि° °भि is suggested by G.
Cf. GBh. on kā. 4, P. 5, ll. 23~24; MV. on kā. 5, P. 13, ll. 21~22; JM. on kā. 5, P. 8, ll. 18~19.
स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः ।
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः ॥
1. GBh सङ्ग° 2. JM निर्वैरः पूजितः सद्भिर्
3. Cf. SV. P. 9, l. 9 & note 4 on SV. P. 9.
4. °ध्येते
5. °रः
6. असतां निरात्मकत्वात् अनुपलब्धिः सतामर्थानां निमित्तादष्टविधादनुपलब्धिः
7. °नो

14 ((१४))

1. नच
2. न
3. स्युः Emended as here.
4. अत्राह
5. °वं° Emended as here by G.

7. न
8. व्ययहृताः
9. चाऽव्ययहृताः
10. Completed as here.
11. अ°
12. °त
13. सम् G.
14. °दीनां
15. °त्वमेवं

15 ((१५))

ने?
1. [---]
2. गवि
3. शिरस्
4. °ब्धि°
5. ऽर्थापत्ये° — cf. SV. P. 13, l. 11.
6. ज्ञाते
(कार्यस्यादिः)
7. तदिदं कार्यं महदादि महानित्युच्यते बुद्धिरहङ्कारः पञ्चतन्मात्रा एकादशेन्द्रियाणि पञ्चमहाभूतानि एतत् कार्यं
Repetition from near place* due to the influence of similar wri[ting]
(*near place indicated within the mark ++, P. 16, ll. 7~8.)

16 १६

1. -तिं Emended as here.
2. -ना Emended as here
3. -॰ना॰-
4. Supposed as here by G.
5. -॰त्सं॰-
6. -॰नं
7. प्रधानस्य
8. -॰न्त
9. -यैर्
10. -॰त्यं
11. -॰त्या
12. -॰न्याश्च
13. cf. MV. p. 16. l. 2 (on kā. 8) तांश्च हेतून् परिष्टाद् वक्ष्यामः।
14. Completed as here by G.
15. सा (?) त्
16. The portions indicated by marks (+ ~ ++) are dislocated in such order as (+, ++, +, ++) in J's copy.
17. प्री॰- G.

17 १७

1. बु॰-
2. दृण्डे
3. यः॰-
4. तः॰-
5. -॰त्
6. completed as here.
7. निषंति Emended as here.
8. -॰णं
9. ऽर्थ इह
10. -॰ थे उ॰-

18 १८

1. -जा- Emended as here.
2. -॰णे
3. Cf. PC. 具足作具 ....; GBh. P. 10, ll. 13~14, इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति। ;(MV. P. 17, ll. 13~15. इह लोके शक्तः शिल्पी करणादिकारणोपादानकालोपायसम्पन्नः शक्यादेव शक्यं कर्म आरभते नाशक्यमशक्यात्।)
4. वाक
5. cf. MV. P. 17. ll. 15 ff. तद्यथा — शक्तः कुम्भकारः शक्यादेव मृत्पिण्डात् शक्यदण्डचक्रसूत्रोदकविदलतलादिभिः सम्पन्नो घटशरावोदञ्चनादीन्यारभमाणो दृष्टः।
6. -॰क्यं
7. पञ्च
8. अयमन्तरः॥छ॥प्रश्नः cf. PC. 中間問已竟還續說前義。
9. -॰त्क्रि॰-
10. यैस्
11. -॰त्यं॰- Emended as here.
12. completed as here.
13. -॰मः

1. स्येति
2. ॰ये
3. शुनहेतु
4. ॰तु:
5. Completed as here.
6. ॰द्धी
7. ॰मती
8. यशोमा॰
9. ॰न
10. ॰हेतु॰
11. ॰मान्
12. Completed as here.
13. added by G. Cf. GBh. यस्मादन्यस्मादुत्पद्यते, यथा – मृत्पिण्डादुत्पद्यते घटः स चानित्यः।
14. इति
15. सत्यपि॰
16. तमेवं
17. ॰त्यानि
18. ॰षे
19. ॰न
20. अशुतं कार्य
21. completed as here.
22. ॰ने

1. ॰क्षे॰
2. निष्पं
3. निराश्रयमित्यर्थः
4. ऽर्थो
5. ॰यं
6. Completed as here.
7. इद॰
8. ॰णमय्या॰
9. ते॰
10. Added by G.
11. पितृणि॰
12. ॰मय॰ cf. GBh. 1.12. ll. 20-21 (on kā. 11) ---- इदं व्यक्तमिमे गुणा इति न विवेकं कर्तुं याति, अयं गौरयमश्व इति यथा।------
13. ॰मभोज्या

1. Cf मल्लदासीवत् (TSP. P. 17. l. 13) = ཕྲ(ད)་དང་འབངས་མོ་བཞིན་ནོ། (Peking ed. (Tokyo) Vol. 138, P. 207, the 5th Step, l. 5.)
PC. (on Kā. 11) 如婢使; (on Kā. 29) 如婢;
मल्लदासीवत् JM (on Kā. 11, P. 14); मल्लदासीवत् । मल्लानां गणस्यैव एका दासी सामान्यास्ति । (SV. on Kā 29); [GBh. refers to मूल्यदासीवत् (on Kā. 11), MV. refers to गणिकावत् (on Kā. 11, P. 20, l. 10)]; SV. P. 21, l. 15.
2. °या
3. Cf. सुखदुःखमोहान्न चेतयति । MV. P. 20, ll. 7~8; सुखदुःखमोहान्न चेतयतीत्यर्थः । GBh. P. 13, l. 2; सुखदुःखमोहान् न वेदयतीत्यर्थः । JM. P. 14, l. 18.
4. -र्मस्या° Cf. JM. प्रसवो धर्मोऽस्यास्तीति प्रसवधर्मि व्यक्तम् । P. 14, l. 20; TK. प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्मि । P. 27. l. 16.
5. इति
6. °नैति
7. -°रास्
8. ष्ठक्र°-
9. -°नः
10. °क्तेति
11. -°र्मि°-
12. किंचान्यत्
13. °ने
14. प्रसवनेपि
15. -°र्वे

1. °ना
2. उत्प°-
3. °वव्य°-
4. किं प्रसवधर्मि
5. °द्धिः
6. added by G.
7. स्व°- Emended as here by G., being "सरूपं च" quotation from Kā. 8.
8. °र्द्धं
9. °णं
10. किंचान्यत् अविवेकि व्यक्तं च विविक्तः पुरुषगुणैर्वियुक्त इत्यर्थः विशुद्धः
11. °कं
12. °न्यं
13. °नि Cf. GBh. P. 13, ll. 22~23, सुखदुःखमोहान् चेतयति संजानीते तस्माच्चेतनः पुरुषः ।
14. चेतनवा | JM. P. 16, l. 6. चेतनः पुरुषः सुखादिवेदनत्वात्
15. असूयते
16. °मान्

1. -वि Emended as here.
2. completed as here.
3. नं
4. completed as here by G.
5. गुणैर्वियुक्तानि बुद्धः किञ्चान्यत् विषयो व्यक्ताव्यक्तं च विषयी पुरुषभोक्ता इत्यर्थः सामान्यं व्यक्तमव्यक्तं च निःसामान्यः पुरुषः किञ्चान्यत् अचेतनं व्यक्तमव्यक्तं चेतनः पुरुषः
6. सोऽवयवं
7. °त्यु°- Emended as here.
8. नें
9. -°नि

28

1. -°ति
2. °शा
3. -°रागणा cf. SV. on kā. 7, p. 14, ll. 12~13
4. स°- Suggested as here.
5. आश्रयन्ति cf. MV. p. 22, ll. 7~8. यथा सपरिकरकुम्भकाराधिष्ठितो मृत्पिण्डो घटं जनयति तद्वज्जनयन्ति।

1. -नेनि
2. -°मसी
3. -°ति
4. Cf. MV. p. 22, ll. 9~10 यथा देवदत्तयज्ञदत्तौ परस्परं बोधयतः एवं बुद्धिस्था गुणाः सत्त्वरजस्तमांसि परस्परं बोधयन्ति।
5. °तः
6. -°आत्मन°-
7. cf. PC. 譬如三人更互相怙同造一事。如是三德在大等中更互相怙共造死生。
G. supposes एकीभावः* क्रियते।
8. -°न्या°-
9. -°नौ
10. -सोर्मि°- Emended following the reading in MV, GBh. & TK.
11. -°र्मिलते Emended following the reading in MV., GBh. & TK.
10. & 11. Cf. MV. p. 22, ll. 13~14; GBh. p. 15, ll. 18~19; PC. 喜樂為憂雙 憂惱與喜雙 有時喜憂惱 與闇癡為雙;
TK. p. 29, ll. 20~25. भवति चात्रागमः—
"अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः।
रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः॥
तमसश्चापि मिथुने ते सत्त्वरजसी उभे।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते*॥
नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते" ॥इति देवीभागवते – ३।६॥
* printed as इ°.
See Kanakura's Japanese tr. of TK. note 5, p. 50; Sharma's notes of TK. p. 20; (Sharma's notes of GBh. p. 18)
Kanakura identifies "婆娑", whose verse in PC. is quoted above, as "頻闍訶婆娑".
12. completed as here.
13. व्यक्तिं
